ওঁ অমৃতোপস্তরণমসি স্বাহা। হে গণ্ডূষরূপজল অমৃতস্থ পঞ্চযজ্ঞাবশিষ্টান্নস্থ উপস্তরণং শয্যেব ত্বমসি। প্রাণায় স্বাহা। অপানায় স্বাহা। সমানায়

ঘৃতাক্তসমিত্ত্রয়মাদায়াদ্যন্তয়োস্তূষ্ণীং মধ্যে প্রজাপতির্ঋষিরগ্নির্দেবতা অগ্নৌ সমিদ্দানে বিনিয়োগঃ। ওঁ অগ্নয়ে সমিধমহার্ষং বৃহতে জাতবেদসে যথা ত্বমগ্নে সমিধা সমিধ্যস্যেব মহমায়ুষা মেধয়া বর্চ্চসা প্রজয়া পশুভির্ব্রহ্মবর্চ্চসেন ধনেনান্নাদ্যেন সমেধিষীয় স্বাহা। ইতি জুহুয়াৎ। ততঃ কর্ম্মশেষোক্তবিধিনা পুনরগ্নিপর্য্যুক্ষণোপক্রমং দক্ষিণপশ্চিমোত্তরক্রমেণোদকাঞ্জলি-সেকং কুর্য্যাৎ। ততঃ অমুক গোত্রঃ শ্রীঅমুক দেবশর্ম্মাহং ভো ঃভিবাদয়ে ইত্যগ্নিমভিবাদ্য ওঁ ক্ষমস্বেত্যগ্নিং বিসৃজ্যাতী-তায়াং সন্ধ্যায়াং ভিক্ষালব্ধমন্নং ক্ষারলবণবর্জ্জিতং সঘৃতং চরুশেষঞ্চ উদকেনাভ্যুক্ষ্য ওঁ অমৃতোপস্তরণমসি স্বাহা ইত্যাপো-শানং কৃত্বা মধ্যমানামিকাঙ্গুষ্ঠৈস্ত্রিপর্ব্বগৃহীতেনান্নেন ওঁ প্রাণায় স্বাহা। ওঁ অপানায় স্বাহা। ওঁ সমানায় স্বাহা। ওঁ উদানায় স্বাহা। ওঁ ব্যানায় স্বাহা। ইত্যনেন পঞ্চাহুতীরভ্যবহৃত্য সর্ব্বত্র প্রাণাহুতিশেষং ভূমৌ নিক্ষিপ্য বামহস্তবিধৃতভোজনপাত্রো বাগ্যতো ভুঞ্জীত। ভোজনাবসানে চ ওঁ অমৃতাপি ধানমসি স্বাহা। ইতি পুনরাপোশানং কর্ম্ম কৃত্বাচামেৎ। এতচ্চাগ্নিকার্য্যং সমাবর্ত্তনপর্য্যন্তং সায়ংপ্রাতঃ প্রত্যহং কার্য্যং। ভোজনঞ্চানেন ক্রমেণ যাবজ্জীবনং কর্ত্তব্যং ॥ * ॥ ইতি উপনয়নকর্ম্ম সমাপ্তং ॥ * ॥ ১০৯

স্বাহা। ওঁ উদানায় স্বাহা। ওঁ ব্যানায় স্বাহা। নিগদাএতে বায়বঃ শারীরাঃ। ওঁ অমৃতাপি ধানমসি স্বাহা। অপিধানমাবরণমাচ্ছাদনমিতি যাবৎ ॥ * ॥

॥ * ॥ * ॥ ইতি উপনয়ন মন্ত্রব্যাখ্যা সমাপ্তা ॥ * ॥ *

অথ চতুর্থেঽহনি সাবিত্রীচরুহোমঃ। তত্র প্রথমং কৃতস্নানঃ পিতা পিতৃব্রতো ব্রহ্মচারিব্রতো বা ঽন্য এবাচার্য্যঃ সমুদ্ভবনামানমগ্নিং সংস্থাপ্য ব্রহ্মস্থাপনানন্তরং প্রাঙ্মুখ উপবিষ্টস্তস্মিন্নেবাগ্নৌ চরুং শ্রপয়েৎ। তস্যানুষ্ঠানং যথা। অগ্নে পশ্চিমায়াং দিশি প্রাগগ্রান্ কুশানাস্তীর্য্য তদুপরি প্রক্ষালিতানীতং বারুণমুদূখলং মুষলং বৈণবঞ্চ সূর্পং বারুণচমসঞ্চ জলপ্রোক্ষিতং সংস্থাপ্য ব্রীহীন্ যবান্ বা সূর্পে নিধায় ওঁ সবিত্রে ত্বা যুষ্টং নির্ব্বপামি ইতি কাংস্যপাত্রে চরুস্থাল্যাং বা গৃহীত্বা উদূখলে স্থাপয়েৎ। দ্বিস্তূষ্ণীং ততো দক্ষিণহস্তমুপরি কৃত্বা মুষলেনাবহত্য সূর্পেণ প্রস্ফোটয়েৎ। ইত্থমেব বারত্রয়ং কৃত্বা ত্রিঃ প্রক্ষাল্য চরুস্থাল্যামমন্ত্রকং কৃতোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য তদুপরি প্রক্ষালিত তণ্ডুলান্নিধায় দুগ্ধং নিঃক্ষিপ্য স্তোকং স্তোকমুদকং দত্ত্বা তন্মধ্যে খদিরপলাশোড়ুম্বরাণামন্যতমস্য প্রাদেশপ্রমাণমগ্রে উভয়তঃ সার্দ্ধাঙ্গুষ্ঠপর্ব্বপ্রমাণং চতুষ্কোণ পুষ্করং মেক্ষণং দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা তথা পচেৎ যথান্তরুষ্মণা সম্যক্ পাকো ভবতি। মণ্ডগালনং দাহশ্চ ন ভবতি। সম্যক্ পাকে ভূতে মধ্যে ঘৃতশ্রুবদ্বয়ং দত্ত্বা প্রাগাদি দিক্‌চিহ্নিতং চরুমবতার্য্যাগ্নেরুত্তরতঃ কুশোপরি স্থাপয়িত্বা পুনর্মধ্যে ঘৃতশ্রুবং দদ্যাৎ। ততো ভূমিজপাদিশ্রুবসংস্কারপর্য্যন্তং কর্ম্ম কৃত্বা ঽগ্নেঃ পশ্চিমত আস্তরণকুশোপরি পূর্ব্বমাজ্যং পশ্চাচ্চরুং নিধায় উদকাঞ্জলিসেকং কৃত্বা বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃত কর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীং প্রক্ষিপেৎ। আজ্যহোম-

বিহিতস্ত মহাব্যাহৃতি হোমশ্চরুহোমত্বাদস্য প্রথমং ন কর্ত্তব্য এব। অন্তে তু কর্ত্তব্যঃ বিহিতত্বাৎ। যদি সংক্ষেপো ঽপেক্ষিতঃ জুহূর্ব্বা ন প্রাপ্যতে তদা চরুমধ্যে ঘৃতশ্রুবং দত্ত্বা তত্রৈব মেক্ষণেন সকৃদন্নং গৃহীত্বা অগ্নিমধ্যে ওঁ সবিত্রে স্বাহা ইতি জুহুয়াৎ। ততো মেক্ষণমগ্নৌ তূষ্ণীং হুত্বা মহাব্যাহৃতি হোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তুষ্ণীমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদি বামদেব্যগানান্তমুদীচ্যং কর্ম্ম সমাপ্যাচার্য্যায় দক্ষিণাং দদ্যাৎ। অথ যদি পিতৈবাচার্য্যস্তদা কর্ম্মকারয়িতৃ ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। অথ প্রবরসংখ্যয়া পঞ্চ বা ত্রয়ো বা মেখলাগ্রন্থয়ঃ কর্ত্তব্যাঃ। অথ চেৎ ফলভূয়স্ত্বমপেক্ষিতং জুহূশ্চ প্রাপ্যতে তদা ভার্গবাদিপ্রবরাণাং জুহ্বাং পঞ্চ ঘৃতশ্রুবং দত্ত্বা ইতর প্রবরাণাং ঘৃতশ্রুবচতুষ্টয়ং দত্ত্বা ঽগ্নেরুত্তরে প্রাগ্গামিনীমাজ্যধারাং ওঁ অগ্নয়ে স্বাহা ইত্যনেন হুত্বা তথৈবাগ্নের্দক্ষিণভাগে ওঁ সোমায় স্বাহেতি জুহুয়াৎ। অথ যদি ভৃগুগোত্রো ভার্গবপ্রবরো ব্রহ্মচারী তদা জুহ্বাং ঘৃতশ্রুবং চরুমধ্যে ঘৃতশ্রুবং দত্ত্বা মেক্ষণেনাবদায় পুনরপি জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতশ্রুবং দদ্যাৎ। ততশ্চরোঃ পূর্ব্বভাগে ঘৃতশ্রুবং দত্ত্বা তত্রৈব মেক্ষণেনাবদায় পুনরপি জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতশ্রুবং দদ্যাৎ। ততশ্চরোঃ পশ্চিমভাগে ঘৃতশ্রুবং দত্ত্বা তত্রৈব মেক্ষণেনাবদায় পুনরপি জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতশ্রুবং দদ্যাৎ। ততো জুহ্বাং সর্ব্বোপরি ঘৃতশ্রুবং দত্ত্বা অগ্নিমধ্যে ওঁ সবিত্রে স্বাহা ইতি জুহুয়াৎ। যদ্যন্যগোত্রো ঽন্যপ্রবরো বা তদা চরোঃ পশ্চিমভাগে ঘৃতশ্রুবং দত্ত্বা ঽবদানং ন কর্ত্তব্যং কিন্তু জুহ্বাং ঘৃতশ্রুবং দত্ত্বা চরুমধ্যে প্রাগাবর্ত্তনমেব চরোরুপরি ঘৃতশ্রুবং দত্ত্বা হোতব্যং। ততোভার্গবাদিপ্র-

সমিত্রে স্বাহা। অগ্নয়ে স্বাহা। সোমায় স্বাহা। অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। শোভনং সম্যক্ ফলাবাপ্ত্যা ইষ্টং যাগং করোতীতি

বরো যদি ব্রহ্মচারী তদা জুহ্বাং ঘৃতশ্রুবদ্বয়ং দত্ত্বা চরোঃ পূর্ব্বভাগে ঘৃতশ্রুবং দত্ত্বা মেক্ষণেন চরোর্বহুতরমন্নং গৃহীত্বা
জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতশ্রুবং দদ্যাৎ। ততো জুহুস্থচরোরুপরি ঘৃতশ্রুবদ্বয়ং দত্ত্বা হমেঃ পূর্ব্বোত্তরভাগে
ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহেতি জুহুয়াৎ। যদ্যন্য প্রবরস্তদা প্রথমমেক এব ঘৃতশ্রুবো জুহ্বাং দাতব্যঃ। ততস্তূষ্ণীমগ্নৌ মেক্ষণং ১১৩
হুত্বা মহাব্যাহৃতি হোমং কৃত্বা তূষ্ণীং সমিৎ প্রক্ষেপান্তং প্রকৃতং কর্ম্ম সমাপ্যানন্তরং সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদি বাম-
দেব্যগানান্তমুদীচ্যং কর্ম্ম সমাপ্যাচার্য্যায় দক্ষিণান্দদ্যাৎ। অথ যদি পিতর্বৈাচার্য্যস্তদা কর্ম্মকারয়িতৃ ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ।

॥ * ॥ ইতি সাবিত্রীচরুহোমঃ ॥ * ॥

স্বিষ্টিকৃৎ। ইতি সাবিত্রীচরুহোমমন্ত্রব্যাখ্যা সমাপ্তা॥ * ॥ * ॥ * ॥ * ॥

অথ সমাবর্ত্তনং। ওঁ অগ্নে ব্রতপতে ব্রতমাচার্ষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং। আরাদ্দূরত এবানৃতাৎ সত্যরূপং



অথ সমাবর্ত্তনং। তত্র কৃতবেদাধ্যয়নমাচার্য্যানুমতং মাণবকং সমাবর্ত্তয়েৎ। তত্র প্রাতঃ কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধঃ পিতা কৃতবৃদ্ধিশ্রাদ্ধেন পিত্রা বৃতো ব্রহ্মচারিবৃতো বা ঽন্য এবাচার্য্যস্তেজো নামানমগ্নিং সংস্থাপ্য বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য মাণবকং দক্ষিণে নিধায় প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা মহাব্যাহৃতি হোমং কুর্য্যাৎ। যথা প্রজাপতির্ঋষির্গায়ত্রীছন্দো ঽগ্নির্দেবতা মহাব্যাহৃতিহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ছন্দঃ সূর্য্যো দেবতা মহাব্যাহৃতি হোমে বিনি- 
য়োগঃ। ওঁ স্বঃ স্বাহা। তত আচার্য্যঃ পঞ্চাহুতীর্জুহুয়াৎ। যথা প্রজাপতির্ঋষিরগ্নির্দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ অগ্নে ব্রতপতে ব্রতমাচার্য্যং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতির্ঋষির্বায়ুর্দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ বায়ো ব্রতপতে ব্রতমাচার্য্যং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতির্ঋষিঃ সূর্য্যো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ সূর্য্য ব্রতপতে ব্রতমাচার্য্যং তত্তে প্রব-

ব্রতমিদং সমুপাগাং সমুপাগতবানস্মি। ও বায়ো ব্রতপতে ব্রতমাচার্যং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমি[illegible]মনৃতাৎ সত্যমুপাগাং। ওঁ সূর্য্য ব্রত-

পতে ব্রতমচার্ষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং। ওঁ চন্দ্র ব্রতপতে ব্রতম[illegible]ং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং। ওঁ যেপ্স্বন্তরগ্নয়ঃ প্রবিষ্ঠা গোহ্য উপগোহ্যো মনৌকো মনোহা খলো বিরজস্তনূদূষিরিন্দ্রিয়হা অভিতান্ সৃজামি।



বীমি তদশকং তেনারাৎ সমিদমহনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতির্ঋষিশ্চন্দ্রো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ চন্দ্র ব্রতপতে ব্রতমাচার্ষং তত্তে প্রব্রবীতি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। প্রজাপতির্ঋষিরিন্দ্রো দেবতা সমাবর্ত্তনহোমে বিনিয়োগঃ। ওঁ ব্রতানাং ব্রতপতে ব্রতাচার্ষং তত্তে প্রব্রবীমি তদশকং তেনারাৎ সমিদমহমনৃতাৎ সত্যমুপাগাং স্বাহা। তত আচার্য্য উদগগ্রেষু কুশেষু উত্তরাভিমুখ উপবিশতি। ব্রহ্মচারী তু আচার্য্যস্য পশ্চিমোত্তরকোণে উদগগ্রেষু কুশেষু প্রাঙ্মুখ উপবিশতি। ততঃ শীতোষ্ণমিশ্রিতাভিরদ্ভি ব্রীহিযবমাষমুদ্গাদ্যোষধিদ্রব্যযুক্তাভিশ্চন্দনাদিগন্ধবাসিতাভিঃ পাত্রান্তরস্থিতাভিঃ স্বাঞ্জলিং পূরয়িত্বা ব্রহ্মচারী আচার্য্যপ্রেরিতো হনেন মন্ত্রেণ ভূমৌ ত্যজেৎ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো হগ্ন্যাদয়ো দেবতাঃ সমাবর্ত্তনে ব্রহ্মচার্য্যুদকাঞ্জলিত্যাগে বিনিয়োগঃ। যেহপ্স্বন্তরগ্নয়ঃ প্রবিষ্টা গোহ্য উপগোহ্যে মনোকঃ মনোহাঃ খলো বিরুজস্তনূদূষিরিন্দ্রিয়হা অভিতান্ সৃজামি। ততঃ পুনস্তাভিরঞ্জলিং পূরয়িত্বা অনেন মন্ত্রেণ ভূমৌ ১১৬

যজুরিদমাগ্নেয়মুদকাঞ্জলিত্যাগে বিনিযুক্তং। যে হগ্নয়ো বক্ষ্যমাণাঃ অপ্সু অন্তর্ম্মধ্যে প্রবিষ্টাঃ। কে পুনস্তে গোহ্য উপগোহ্যঃ মনোকঃ মনোহা খলো বিরুজঃ তনূদূষিঃ ইন্দ্রিয়হা তানেতানষ্টৌ অগ্নীব কুলদূষণান্ অভিসৃজামি ত্যজাম্যহি যেনেদং জলং মম স্নানযোগ্যং ভবতীত্যর্থঃ। ওঁ যদপাং ঘোরং যদপাং

ক্রূরমিত্যাদি। ঘোরাদয়ো দেবতাঃ। অপাং সম্বন্ধি যদ্ঘোরং ভীমং যাতং ক্রূরং নিষ্ঠুরং যচ্চাশান্তং রুজাকরং তদভিসৃজামি। ওঁ যো রোচন-
স্তমিহ গৃহ্লামি তেনাহং মামভিষিঞ্চামি। যজুরিদং রোচননামাগ্নিদৈবতং অভিষেকে বিনিযুক্তং। গোষ্ঠাদিষু ত্যক্তেষু যো হগ্নো রোচনাখ্যো হগ্নিদীপ্তিকরস্তমিহ
গৃহ্লামি জলান্তর্ব্বাসিনা তেন রোচনেনাহং আত্মানমভিষিঞ্চামি। কিমর্থং যশসে তেজসে ব্রহ্মবর্চ্চসায় বলায়েন্দ্রিয়ায় বীর্য্যায়ান্নাদ্যায় রায়স্পোষায়
ত্বিষ্ট্যৈ অপচিত্যৈ রায়স্পোষো ধন সমৃদ্ধিঃ। ত্বিষ্টির্দীপ্তিঃ। অপচিতিঃ প্রজাপ্রাপ্তিঃ। ওঁ যেন স্ত্রিয়মকৃণুতং যেনাপামৃষতং সুরাং যেনাক্ষানভ্যসিঞ্চতং যেচেমাং
ত্যজেৎ। প্রজাপতির্ঋষির্ব্বৃহতীচ্ছন্দো হপাং ঘোরক্রূরাশান্তরূপা দেবতা সমাবর্ত্তনে ব্রহ্মচার্য্যদকাঞ্জলিত্যাগে বিনিয়োগঃ। ওঁ
যদপাং ঘোরং যদপাং ক্রূরং যদপামশান্তমভি তৎ সৃজামি। ততঃ আচার্য্যপ্রেরিতো ব্রহ্মচারী তাভিরদ্ভিঃ স্বাঞ্জলিং পূরয়িত্বা
অনেন মন্ত্রেণাআত্মানমভিষিঞ্চেৎ। প্রজাপতির্ঋষী রোচনো হগ্নির্দেবতা সমাবর্ত্তনে ব্রহ্মচার্য্যদকাঞ্জলিষেকে বিনিয়োগঃ। ওঁ যো
রোচনস্তমিহ গৃহ্লামি তেনাহং মামভিষিঞ্চামি। ততঃ পুনরপি পূর্ব্ববদেব স্বাঞ্জলিং পূরয়িত্বা হনেন মন্ত্রেণাত্মানমভিষিঞ্চেৎ। ১১৭
প্রজাপতির্ঋষী রোচনো হগ্নির্দেবতা সমাবর্ত্তনে ব্রহ্মচার্য্যদকাঞ্জলিষেকে বিনিয়োগঃ। ওঁ যশসে তেজসে ব্রহ্মবর্চ্চসে বলায়েন্দ্রিয়ায়
বীর্য্যায়ান্নাদ্যায় রায়স্পোষায় ত্বিষ্ট্যায়াপচিত্যৈ। ততঃ পুনরপি অঞ্জলিং গৃহীত্বা অনেন মন্ত্রেণাভিষিঞ্চেৎ। প্রজাপতির্ঋষিঃ
ষড়ষ্টকা মহাপঙ্‌ক্তিচ্ছন্দো হশ্বিনৌ দেবতে সমাবর্ত্তনে ব্রহ্মচার্য্যদকাঞ্জলিষেকে বিনিয়োগঃ। ওঁ যেন স্ত্রিয়মকৃণুতং যেনা-
পামৃষতং সুরাং যেনাক্ষানভিষিঞ্চতং যেনেমাং পৃথিবীং মহীং যদ্বাং তদশ্বিনৌ যশস্তেন মামভিষিঞ্চতং। ততঃ পুনরপি তাদৃ-
পৃথিবীং মহীং। যত্তাং তদশ্বিনা যশস্তেন মামভিষিঞ্চতং। ষড়ষ্টকা মহাপঙ্‌ক্তিরিয়ং। অশ্বিনৌ দেবতে অশ্বিনৌ দেববৈদ্যৌ কর্ম্মণামধিষ্ঠাতারৌ। ব্রহ্মচারিণা
সস্তূয় প্রার্থ্যতে। হে অশ্বিনা হে অশ্বিনৌ যেন কর্ম্মণা যুবাং অপুণ্যাখ্যাং স্ত্রিয়মকৃণুতং হিংসিতবন্তৌ। যেন চ সুরাং মদিরাং অপামৃষতং খণ্ডিতবন্তৌ।
যেনাক্ষান্ পাশান্ অপামৃষতং যেন চ ইমাং পৃথিবীং মহীং হতীং অভ্যষিঞ্চতং অভিষিক্তবন্তৌ। শস্য প্ররোহণদ্বারেণ সংবর্দ্ধিতবন্তৌ। এব-

স্তুতং যৎ স্বাং যুবয়োর্যশঃ শোভনং কর্ম্ম তেন মামভিষিঞ্চতং। যথা যুবাভ্যামহমভিষিক্তঃ কৃতকৃত্যো ভবা[mi]। অশ্বিনা ইতি সুপাংসুলুগিত্যাদিনা প্রথমাদ্বিবচনস্য নাদেশঃ। যেচেমামিত্যত্র যে ইতি ইয়াডিয়াজীকারণামুপ সংখ্যানমিতীকারে কৃতে আদগুণঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ প্রাতর্যাবভিরস্থাৎ দশসনিরসি দশসনিং মা কুর্ব্বাত্বাবিশাম্যাবিশ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সান্তপনেভিরস্থাৎ শতসনিরসি শতসনিং মা কুর্ব্বাত্বাবিশাম্যাবিশ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সায়ং যাবভিরস্থাৎ সহস্রশনিরসি সহস্রসনিং মা কুর্ব্বাত্বা বিশাম্যাবিশ।

শেনাঞ্জলিনা তূষ্ণীমাত্মানমভিষিঞ্চেৎ। ততো হভিষেকানন্তরমাদিত্যাভিমুখ উত্থায় ব্রহ্মচারী চতুর্ভির্মন্ত্রৈরাদিত্যমুপতিষ্ঠেৎ। যথা প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দ আদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ। প্রাতর্যাবভিরস্থাৎ দশসনিরসি দশসনিং মা কুর্ব্বাত্বাবিশাম্যাবিশ ॥ ১ ॥ প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দ আদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সান্তপনেভিরস্থাৎ শতসনিরসি শতসনিং মা কুর্ব্বাত্বাবিশাম্যাবিশ ॥ ২ ॥ প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দ আদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। ওঁ উদ্যন্ ভ্রাজভৃষ্টিভিরিন্দ্রো মরুদ্ভিরস্থাৎ সায়ং যাবভিরস্থাৎ সহস্রসনিরসি সহস্রসনিং মা কুর্ব্বাত্বাবিশাম্যাবিশ ॥ ৩ ॥ প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দ আদিত্যো দেবতা আদিত্যোপস্থানে বিনিয়োগঃ। চক্ষুরসি চক্ষুষ্ট্বমস্য বাম পাপ্মানং জহি সোমস্ত্বা রাজা অবতু নমস্তে হস্তু মা মা হিংসীঃ ॥ ৪ ॥ ততো ব্রহ্মচারী মেখলামনেন মন্ত্রেণাধস্তান্মোচয়েৎ। শুনঃ শেফঋষিস্ত্রিষ্টুপ্‌ছন্দো বরুণো দেবতা মেখলামো-



ও চক্ষুরসি চক্ষুষ্টমস্য বাম পাপ্মানং জহি সোমস্ত্বা রাজা অবতু নমস্তে হস্তু মা মা হিংসীঃ। এতন্মন্ত্রচতুষ্টয়মাদিত্যদৈবতমাদিত্যোপস্থানে বিনিযুক্তং। ত্রীণি যজুংষি শেষোঽনুষ্টুপ্। পরমৈশ্বর্য্যযোগাৎ ইন্দ্রঃ আদিত্য উদ্যন্ উদীয়মানঃ মরুদ্ভির্দেবৈঃ সহাস্থাৎ স্থিতবান্। কিম্ভূতৈঃ ভ্রাজভৃষ্টিভিঃ ভ্রাজত ইতি ভ্রজোর্জ্জনং ভৃষ্টির্যেষাং তে তথোক্তাঃ। তৈঃ অতিশয়দীপ্যমানৈরিত্যর্থঃ। ন কেবলং মরুদ্ভিরাস্থাৎ প্রাতর্যাবানো দেশবিশয়াস্তৈঃ

॥ * ॥ সামবেদীয় সমাবর্ত্তনং ॥ * ॥

মহাস্থাৎ। কিঞ্চ দশসনিরসি। দশানাং সংবিভর্ত্তাসি অতো মামপি দশসনিং কুরু অহং ত্বা ত্বাং আবিশামি অর্থিত্বেনোপগচ্ছামি অতস্ত্বমপি মা মাং আবিশ অভিমত ফলদানেনাভিমুখো ভব। প্রাতর্যাবভিরিতি যা প্রাপণে। অতোযণি ন, ক্বনিপবনিপশ্চেতিবনিপ্। দশসনিরিতি বনষণ সংভক্তৌ ছন্দসি ষণ বক্ষিসখামিতীন। আবিশামি আবিশেতি ব্যবহিতোপসর্গসম্বন্ধঃ। শান্তপনা দেববিশেষাঃ বহুলং ছন্দসীতি ঐস্ ন ভবতি। সায়ং যাবানো দেববিশেষাঃ।

চনে বিনিয়োগঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধনং বিমধ্যমং শ্রথায়। অথাদিত্যব্রতে বয়ং তবানাগসো হদিতয়ে স্যাম। ততঃ আচার্য্যো বিল্বদণ্ডমগ্নৌ ক্ষিপ্ত্বা মহাব্যাহৃতি হোমং কৃত্বা প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং কর্ম্ম সমাপ্য সর্ব্বকর্ম্মসাধারণং শাট্যায়নহোমাদি বামদেব্যগানান্তমুদীচ্যং কর্ম্ম সমাপয়েৎ। ততো ব্রহ্মচারী ব্রাহ্মণান্ ভোজয়িত্বা স্বয়ঞ্চ ভুক্ত্বা শিখাবর্জ্জং কেশশ্মশ্রুনখানাং স্ফোটনং কারয়িত্বা স্নাত্বা শুভে লগ্নে আহতে বাসস পরিধায় কৃতালঙ্কারো ১১৩
হনেন মন্ত্রেণ যজ্ঞোপবীতদ্বয়ং পরিদধ্যাৎ। ততঃ প্রজাপতির্ঋষির্যজ্ঞোপবীতং দেবতা সমাবর্ত্তনে যজ্ঞোপবীতদ্বয়পরিধাপনে বিনিয়োগঃ। ওঁ যজ্ঞোপবীতমসি যজ্ঞস্যত্বোপবীতেনোপনেহ্যামি। ততঃ কৃষ্ণসারাজিনং ত্যক্ত্বা কালান্তরেহপি ছিন্নং যজ্ঞোপবীতং জলে ক্ষিপ্ত্বা অপরমেতমন্ত্রাভিমন্ত্রিতং গৃহীয়াৎ। ততঃ স্নাতকো হনেন মন্ত্রেণ মূর্দ্ধ্নি স্রজং বধ্নীয়াৎ। প্রজাপতির্ঋষিঃ

হে সূর্য্য মে মম পাপানাং অনিষ্টং অবজহি। যস্ত্বং ত্রৈলোক্যস্য চক্ষুরসি তথা লোকস্যাপি চক্ষুঃ দর্শনশক্তিস্ত্বমসি। কিঞ্চ সোমো ব্রাহ্মণানামোষধীনাঞ্চ রাজা ত্বা ত্বাং অবতু আপ্যায়তু। দেবানামন্নং চক্ষু ইতি কৃত্বা এবং ভূতায় নমস্তে হস্তু মা মা হিংসীঃ। চক্ষুষ্টৃমিতি যুষ্মত্তচ্চক্ষুষ্মস্তঃ পাদমিতিষত্বং টুত্বঞ্চ। অবজহীতি ব্যবহিতোপসর্গসম্বন্ধঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায় অথাদিত্য ব্রতে বয়ং তবানাগসো হদিতয়ে স্যাম। ত্রিষ্টুবিয়ং শুনঃ

শেফঋষিৰ্ব্বরুণো দেবতা মেখলামোচনে বিনিযুক্তা। অনয়া ত্রিষ্টুপা শুনঃ শেফস্ত্রিভিঃ পাশৈর্ব্বদ্ধঃ তদ্বিমোক্ষায় বরুণং প্রার্থয়ামাস। হে বরুণ অস্মৎ সকাশাৎ উত্তমং কণ্ঠাবস্থিতং পাশং বন্ধনং ইচ্ছুথায় উর্দ্ধমুশ্রাবয় অধমং পাদাবস্থিতং অবশ্রথায় অধস্তাদবতারয় মধ্যমং কটিদেশাবস্থিতং অবশ্রথায় তত্রস্থমেব শিথিলীকুরু। অথ পাশ বিমোক্ষানন্তরং শুনঃ শেফেন বরুণঃ প্রার্থ্যতে। হে আদিত্য অদিতিপুত্র বরুণ অথ পাশমোক্ষানন্তরং তব ব্রতে পরিচর্য্যালক্ষণে বয়ং অনাগসো হল্পবাধাঃ সন্তঃ স্যাম ভবেম। ন কেবলং তব অদিতয়ে অদিতেশ্চ তব মাতুঃ। শ্রথায়েতি শ্রথ্নাতের্লোট্ সিপ্।

শ্রীর্দ্দেবতা স্রগ্বন্ধনে বিনিয়োগঃ। ওঁ শ্রীরসি ময়ি রমস্ব। ততো ব্রহ্মচারী প্রজাপতির্ঋষিরুপানহৌ দেবতে উপানৎ পরিধা- পনে বিনিয়োগঃ। ওঁ নেত্র্যৌ স্থো নয়তং মাং। অনেন মন্ত্রেণ চর্ম্মপাদুকাযুগলে পাদৌ নিদধ্যাৎ। ততো ব্রহ্মচারী স্বপ্র- মাণং বৈণবং দণ্ডমনেন মন্ত্রেণ গৃহ্লাতি। প্রজাপতির্ঋষির্দণ্ডো দেবতা দণ্ডগ্রহণে বিনিয়োগঃ। ওঁ গন্ধর্ব্বস্যোপমা অব। ততঃ কৃষ্ণসারাজিনং যজ্ঞোপবীতং ত্যক্ত্বা দণ্ডোপরি নিদধ্যাৎ। ততো ব্রহ্মচারী আচার্য্যসমীপং গত্বা সপরিষদমাচার্য্যমনেন মন্ত্রেণ পশ্যেৎ। প্রজাপতির্ঋষিরাচার্য্যপরিষদৌ দেবতে আচার্য্যপরিষদ্বীক্ষণে বিনিয়োগঃ। ওঁ যক্ষমিব চক্ষুষঃ প্রিয়ো বো ভূয়াসং। অথ ব্রহ্মচারী কর্ম্মাপদেশসমীপং গত্বোবিশ্য প্রসারিতাঙ্গুলিনা দক্ষিণহস্তেন মুখমাচ্ছাদ্য মুখভবং প্রাণবায়ুং সংস্পৃশন্নিমং 

ছন্দসি শায়চ তৎ অবধি ইত্যেতে ব্যবহিতাঃ। আদিত্যেতি দিত্যদিত্যাদিনা ণ্যঃ। ওঁ শ্রীরসি ময়িরমস্ব। শ্রীর্দেবতং স্রগ্বন্ধনে বিনিযুক্তং। হে মালে যা ত্বং শ্রীর্লক্ষ্মীরসি সা ময়ি রমস্ব অবস্থানং কুরু। ওঁ নেত্র্যৌ স্থো নয়তং মাং। উপানদ্দৈবতং। যজুঃ। উপানৎপরিধাপনে বিনিযুক্তং। হে উপানহৌ যতো যুবাং নেত্র্যৌ নয়নশক্তিপ্রদেবস্থঃ ভবথঃ অতোমাং নয়তং ইষ্টপ্রাপ্তয়ে দেশান্তরং প্রাপয়তং। ওঁ গন্ধর্ব্বো হস্যুপমা অব। দণ্ডগ্রহণে বিনিযুক্তং। দণ্ড দৈবতং যজুরিদং। হে দণ্ড যতস্ত্বং গন্ধর্ব্ব আদিত্যোপি রক্ষণকর্ত্তাসি অতো মা মাং উপাব। উপ সমীপে রক্ষ। অবরক্ষণে ব্যবহিতোপসর্গ সম্বন্ধঃ। ওঁ যক্ষ-

বিমচক্ষুষঃ প্রিয়ো বো ভূয়াসং মজুরিদং আচার্য্যপরিষদোক্ষীক্ষণে বিনিযুক্তং। এতদেব তে আচার্য্যপরিষৎ সমেতরো যুষ্মাকং চক্ষুষঃ প্রিয়ো হহং ভূয়াসং। ক ইব যক্ষমিব। যথা যক্ষো দর্শনীয়তয়া সর্ব্বলোকস্য বল্লভঃ তথাহমপি যুষ্মচ্চক্ষুষামিত্যর্থঃ। যক্ষমিব লিঙ্গব্যত্যয়েন ন পুংসকত্বং। চক্ষুষ ইতি জাতাবেকবচনং ওঁ ওষ্ঠাপিধানা নকুলী দন্তপরিমিতঃ পরিজিহ্বে মা বিহ্বলোবাচং চারুমাদ্যেহবাদয়ঃ। অনুষ্টুবিয়ং জিহ্বাদেবতা মুখপ্রাণস্পর্শনে বিনিযুক্তা। স্নাতকেন জিহ্বা প্রার্থতে। হে জিহ্বে ইহ প্রস্তুতে কর্ম্মনি অদ্য ত্বাং মা বিহ্বল মা চলিষ্ঠঃ। উশব্দঃ পাদপূরণে। মা মাং চারু শোভনং যথাস্যত্তথা বাচং বাদয় অতস্ত্বং

মন্ত্রং পঠেৎ। প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দো জিহ্বা দেবতা মুখপ্রাণস্পর্শনে বিনিয়োগঃ। ওঁ ওষ্ঠাপিধানা নকুলী দন্তপরিমিত পরিদন্তা জিহ্বে। মা বিহ্বল বাচং চারুমাদ্যেহ বাদয়ং। অথাচার্য্যস্তমর্ঘ্যপাদ্যাদিভিরভ্যর্চ্চয়েৎ। ততো ব্রহ্মচারী গোযুগ-সহিতস্য রথস্য সমীপং গত্বা পঙ্ক্তীশব্দবাচ্যং ক্রূরশব্দবাচ্যং বা রথাবয়বদ্বয়ং স্পৃশন্ অনেন মন্ত্রেণ পাদত্রয়েণ রথমারোহ-য়েৎ। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দো রথো দেবতা রথাবরোহণে বিনিয়োগঃ। ওঁ বনস্পতে বীড়ঙ্গো হি ভূয়া অস্মৎসখা প্রত-

ওষ্ঠাপিধানা ওষ্ঠঃ অপিধানমাবরণং যস্যাঃ সা তথা। নকুলী চঞ্চলস্বভাবা তথা দন্তপরিমিতঃ পরিদন্তাবরণে বজ্র ইব ত্বং। ওঁ বনস্পতে বীড়ঙ্গো ভূয়া অস্মৎ সখা প্রতারণঃ সুবীরো গোভিঃ সন্নদ্ধাসি বীড়য়স্ব। ওঁ আস্থাতা তে জয়তু জেত্বানি। ত্রিষ্টুবিয়ং রয়ো দেবতা রথারোহণে বিনিযুক্তা। রথঃ প্রার্থ্যতে। বনস্পতি বিকারত্বাৎ বনস্পতি শব্দেন রথ এবোচ্যতে। হে বনস্পতে রথ ত্বং বীড়ঙ্গো ভূয়াঃ বিড়ানি মহাভারসহানি অঙ্গানি চক্রকূবরপ্রভৃতীনি যস্য স তথাস্মৎ সখা অস্মাকং মিত্ররূপো ভূয়াঃ। তথা প্রতরণঃ প্রকর্ষেণ তরন্তি দুর্গানি যেন স তথা। তথা সুবীরঃ সুসারথিঃ। তথা গোভির্বৈভঃ সন্নদ্ধোসি সংযুক্তোসি।

যত স্ত্বমেবম্ভূতো ঽতস্ত্বং অতো ঽস্মানপি বীড়য়স্ব দৃঢ়ান্ কুরু। কিঞ্চ তে তব আস্থাতা আরোঢ়া জেত্বানি জেতব্যানি দ্বিষদ্ধনানি জয়তু। বীড়য়স্ব ইতি বিড়॰

রথঃ সুবীরো গোভিঃ সন্নদ্ধো ঽসি বীড়য়স্ব। ততো ঽনেন মন্ত্রেণ চতুর্থপাদেনোপবিশতি। ওঁ আস্থাতা তে জয়তু জেত্বানি।
ততঃ প্রাঙ্মুখ উদঙ্মুখো বা ব্রহ্মচারী রথেন গত্বা কিয়দ্দূরং গতে সতি মাতৃবন্ধুঃ স্ত্রীভিঃ সহ তং ব্রহ্মচারিণং প্রবোধি-
তমর্চ্চয়েৎ। ততঃ ব্রহ্মচারী দক্ষিণেন পরাবৃত্যাচার্য্যসমীপমাগচ্ছতি। আচার্য্যঃ পুনরর্ঘ্যং দদ্যাৎ। ততো যদি পিতৈবাচার্য্য-
স্তদা কর্ম্মকারয়িতৃ ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। যদ্যন্য এবাচার্য্যো ব্রতস্তদা যেন ব্রতঃ স তস্মৈ দক্ষিণাং দদ্যাৎ ॥ * ॥
॥ * ॥ * ॥ ইতি সমাবর্ত্তনকর্ম্মসমাপ্তং ॥ * ॥ * ॥

শবদস্য চ্ছন্দ দীর্ঘত্বংপি বীড়য়স্বেত্যত্র চ। জেত্বানীতি জি জয়ে কৃত্যার্থে তবৈকেন কেন্যত্ব ইতি ত্বন প্রত্যয়ঃ ॥ * ॥ ইতি সমাবর্ত্তন মন্ত্রব্যাখ্যা সমাপ্তা ॥ * ॥

অথ শালাকর্ম্ম। তত্র প্রথমং নবগৃহপ্রবেশদিবসে প্রাতঃ কৃতস্নানঃ কৃতবৃদ্ধিশ্রাদ্ধো গৃহপতি স্বয়ং গৃহপতিরতো বান্যো ব্রাহ্মণো গৃহাভ্যন্তরে কুশণ্ডিকোক্তবিধানেন গৃহপতিঃ শুভনামানমগ্নিং সংস্থাপ্য ব্রহ্মস্থাপনানন্তর প্রাঙ্মুখোপবিষ্টস্তস্মিন্নেবাগ্নৌ চরুং শ্রপয়েৎ। তস্যৈবানুষ্ঠানমুচ্যতে। অগ্নেঃ পশ্চিমায়াং দিশি প্রাগগ্রান্ কুশানাস্তীর্য্য তদুপরি প্রক্ষালিতানীতং বারুণমুদূখলং মুষলং বৈণবঞ্চ শূর্পং বারুণচমসস্থ জলপ্রোক্ষিতং সংস্থাপ্য ধান্যমানীয় তদভাবে যবম্বা বক্ষ্যমাণ মন্ত্রৈ প্রত্যেকং ত্রিঃ প্রক্ষালয়েৎ। ওঁ বাস্তোষ্পতয়ে ত্বা জুষ্টং প্রোক্ষয়ামি। ওঁ ইন্দ্রায় ত্বা জুষ্টং প্রোক্ষয়ামি। ওঁ ভূস্ত্বা জুষ্টং প্রোক্ষয়ামি। ওঁ স্বস্ত্বা জুষ্টং প্রোক্ষয়ামি। ওঁ প্রজাপতয়ে ত্বা জুষ্টং প্রোক্ষয়ামি। ইত্যষ্টৌ বারান্ প্রোক্ষয়েৎ। ততো কাংস্যপাত্রেণ চরুস্থাল্যা বা ওঁ বাস্তোষ্পতয়ে ত্বা জুষ্টং নির্ব্বপামি ইতি গৃহীত্বা উদূখলে স্থাপয়েৎ। দ্বিমুষ্টী এবং ইন্দ্রায় ত্বা জুষ্টং নির্ব্বপামি। ওঁ ভূস্ত্বা জুষ্টং নির্ব্বপামি। ওঁ ভুবস্ত্বা জুষ্টং নির্ব্বপামি। ওঁ স্বস্ত্বা জুষ্টং নির্ব্বপামি। ওঁ প্রজাপতয়ে ত্বা জুষ্টং নির্ব্বপামি। ইত্যেতৈর্ম্মন্ত্রৈ প্রত্যেকং দ্বিমুষ্টীঞ্চ গৃহীত্বা উদূখলে স্থাপয়েৎ। ততো দক্ষিণহস্তমুপরি কৃত্বা মুষলেনাবহত্য শূর্পেণ প্রস্ফোটয়েৎ। ইত্থমেব বারত্রয়ং কুর্য্যাৎ। ততস্ত্রিঃ প্রক্ষাল্য চরুস্থাল্যামমন্ত্রকং কৃতোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য স্তোকং স্তোকমুদকং দত্ত্বা তন্মধ্যে খদিরপলাশোডুম্বরাণামন্যতমস্য প্রাদেশপ্রমাণং অগ্রে উভয়তঃ স্বাঙ্গুষ্ঠপর্ব্বপ্রমাণং চতুষ্কোণ পুষ্করং মেক্ষণং দক্ষিণাবর্ত্তেন ভ্রাময়িত্বা তথা পচেৎ যথান্তরুষ্মাণা সম্যক্ পাকো ভবতি। পাকে জাতে মধ্যে ঘৃতশ্রুবং দত্ত্বা প্রাগাদি দিক্‌চিহ্নিতং চরুমবতার্য্যাগ্নেরুত্তরতঃ কুশোপরি স্থাপয়েৎ। পুনর্মধ্যে ঘৃতশ্রুবং দদ্যাৎ। ততো ভূমিজপাদি প্রোক্ষণংকারান্তং

ও বাস্তোষ্পতে প্রতিজানীহ্যস্মান্ স্বাবেশো অনমীবো ভবা নঃ যত্ত্বেমহে প্রতিতন্নো জুষস্ব। শন্নোভব দ্বিপদেশং চতুষ্পদে।
ত্রিষ্টুবিয়ং বশিষ্ঠঋষির্ব্বাস্তোষ্পতীয়া নবগৃহপ্রবেশ পায়সচরুহোমে বিনিযুক্তা। হে বাস্তোষ্পতে প্রতিজানীহি জুহ্বতো ঽস্মান ববুধ্যস্ব। তথা গতি স্বং

কর্ম্ম কৃত্বা অগ্নেঃ পশ্চিমতঃ স্তরণকুশোপরি স্থাপয়েৎ। পূর্ব্বমাজ্যং পশ্চাচ্চরুং নিধায় উদকাঞ্জলিষেকাদি বিরূপাক্ষজপান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতকর্ম্মারম্ভে প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তুষ্ণীমগ্নৌ প্রক্ষিপেৎ। আজ্যহোমবিহিতস্তু মহাব্যাহৃতি হোমশ্চরুহোমত্বাদস্য প্রথমং ন কর্ত্তব্যো ঽন্তে তু কর্ত্তব্য এব বিহিতত্বাৎ। ততশ্চরৌ ঘৃতস্রুবন্দত্ত্বা মেক্ষণেনাজ্যাহুতীর্জুহুয়াৎ। যথা বশিষ্ঠঋষিস্ত্রিষ্টুপ্ছন্দো বাস্তোষ্পতির্দ্দেবতা নবগৃহপ্রবেশে চরুহোমে বিনিয়োগঃ। ওঁ বাস্তোষ্পতে প্রজানীহ্যস্মান্ স্বাবেশো-ঽনমীবো ভবা ন যত্তে মহে প্রতি তন্নো জুষস্ব শন্নো ভব দ্বিপদে শং চতুষ্পদে স্বাহা ॥ ১ ॥ মহাবামদেব্যঋষির্বিরাড়্গায়ত্রীচ্ছন্দ ইন্দ্রো- 
দেবতা নবগৃহপ্রবেশে পায়সচরুহোমে বিনিয়োগঃ। ওঁ কয়ানশ্চিত্র আভুবদূতী সদাবৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা স্বাহা। মহাবামদেব্য-ঋষির্বিরাড়্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা নবগৃহপ্রবেশে পায়সচরুহোমে বিনিয়োগঃ। ওঁ কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ দৃঢ়া চিদা রুজে বসু স্বাহা। মহাবামদেব্যঋষির্বিরাড়্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা নবগৃহপ্রবেবেশে পায়সচরুহোমে বিনিযোগঃ। ওঁ অভীষুণঃ সখীনামবিতা জরিতৃণাং শতম্ভবাঃ স্যূতয়ে স্বাহা ॥ ১ ॥ প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দেবতা নবগৃহপ্রবেশে পায়সচরুহোমে

অনমীব আরোগ্যকরঃ স্বাবেশঃ শোভন প্রবেশো ভবা নো ঽস্মাকং। কিঞ্চ যত্তে তব মহে উৎসবে পূজাদিকং কুর্ম্মঃ তন্নো ঽস্মাকং প্রতিজুষস্ব প্রতীচ্ছ।
এবঞ্চ প্রণিতস্ত্বং নো ঽস্মাকং সম্বন্ধিনে দ্বিপদে চতুষ্পদে চ শং কল্যাণরূপোভব। অমীব রোগ উচ্যতে। ভবা ইতি। দ্ব্যচো ঽতস্তিঙ ইতি দীর্ঘঃ। ওঁ কয়ানশ্চিত্র

ইতশ্চেত্যাদিনা ইকারলোপঃ। বৃধ ইতি ইগুপধজ্ঞা-
স্থলগিতি পূর্ব্বসবর্ণঃ। আভুবদিতি আসংশারাং লিঙর্থে লেট শিটোডাটাবিত্যাট্ ধাতো কুরুঙ ইতশ্চেত্যাদিনা ইকারলোপঃ। কিন্তুতো রসঃ সত্যঃ গোমযাগে ক্রিয়মাণে হবস্তুং
প্রীকিরঃ কঃ। হেন্দ্রকঃ কোবসঃ স্বা স্বাং মৎসৎ মত্তং করোতি কস্মরসঃ অমস্থ গোমস্থেতি যাবৎ। কিন্তুতো রসঃ সত্যঃ গোমযাগে ক্রিয়মাণে হবস্তুং ধনানি দৃঢ়া চিৎ দৃঢ়াস্থপি স্ববর্ণ প্রভৃতীন্যপি ধনানি
ভাবী। পুনঃ কিন্তুতঃ মদানাং সুরাদীনাং মধ্যে মংহিষ্ঠো হতিশয়েন মদজনকঃ। যেন মদেন মত্তস্ত্বং বসু বসুনি ধনানি দৃঢ়া চিৎ ঠন্ ভুবিষ্টে মে বয়ঃসিতি ভূতো লোপঃ। 
যাগকর্ত্তৃভ্যো দাতুং আরুজে ভঞ্জয়সি ত্বয়া কথিতে বয়ং ইদমন্বর্কানঃ। মংহিষ্ঠ ইতি মহি বৃদ্ধৌ তৃজন্তাত্ ছন্দসীতি ঠন্ ভুবিষ্টে মে বয়ঃসিতি ভূতো লোপঃ। আরুজ ইতি তিঙাতিঙো ভবন্তীতি সিপঃ
মৎসদিতি মদী হর্ষে গন্তাম্লেট তিপ সিপ হলঙঃ লেটীতি সিপ লোপঃ দৃঢ়া ইতি শেছন্দসি বহুলমিতি শসশের্লোপঃ। আরুজ ইতি তিঙাতিঙো ভবন্তীতি সিপঃ
স্থানে উত্তমৈকবচনে মিটবন্থিতি সুপাং সুলুগিতি শেলুক। হে ইন্দ্র নো হস্মাকং তথা মঘীনাং মিত্রাণাং তথা জরিতৃণাং স্তোতৃণাং অবিতা পালয়িতা ভবসি
ভব। অভী অভিমুখোন সু সুষ্টু যথা স্যাৎ। কিন্তুতঃ সঃ শতং স্বয়ং শতধাভূত ইত্যর্থঃ। কিমর্থমবিতা তব উতয়ে বহু প্রকার রক্ষণায় অভীষ্ণঃইকঃ * ॥ * ॥ * ॥ * ॥ * * ॥ * ॥
সুএ্রীতি দীর্ঘঃ। সুএ্র ইতি যত্বং নশ্চধা টুভো ইতি ণত্বং ভবমীতিলেট্ ধাতুনামনেকার্থত্বাজ্জীর্যাতিঃ স্তুত্যর্থঃ ॥ * ॥ * ॥ * ॥ * ॥
॥ * ॥ * ॥ * ॥ * ॥ ইতি শালাকর্ম্মমন্ত্রব্যাখ্যাসমাপ্তাঃ ॥ * ॥

অথাধিবাসনং। স্বস্তিবাচনং কৃত্বা এতে গন্ধপুষ্পে ওঁ আদিত্যাদিনবগ্রহেভ্যো নমঃ। ইতি সংপূজ্য সঙ্কল্পং কুর্য্যাৎ। যথা বিষ্ণুরোঁ। তৎসদদ্যামুকমাস্যমুকপক্ষে হমুকতিথৌ অমুকগোত্রস্যামুকদেবশর্ম্মণঃ শুভামুককর্ম্মাঙ্গভূত গণপত্যাদি দেবতা ষষ্ঠীমার্কণ্ডেয় পূজাপূর্ব্বকং শুভাধিবাসনমহং করিষ্যামি ইতি সঙ্কল্প সূক্তং পঠিত্বা শালগ্রামে ঘটে বা গণেশাদীন্ সংপূজ্যাধিবাসং কুর্য্যাৎ। যথা মহী গন্ধঃ শিলা ধান্যং দূর্ব্বা পুষ্পং ফলং দধি। ঘৃতং স্বস্তিকসিন্দূরং শঙ্খকজ্জলরোচনাঃ। সিদ্ধার্থং কাঞ্চনং রৌপ্যং তাম্রং চামরদর্পণং। দীপঃ প্রশস্ত পাত্রঞ্চ বন্দনীয়াঃ শুভে দিনে। যথা ওঁ মহিত্রীণামবরস্তু দ্যুক্ষং মিত্রস্যার্য্যম্ণো দুরাধর্ষং বরুণস্য। ইতি পঠিত্বা অনয়া মহ্যা অস্য শুভাধিবাসনমস্তু। ইতি ক্রমেণ বিষ্ণৌ স্পর্শনং ভূমাবতারণং সংস্কার্য্য-শিরসি নিধানমিতি ॥ ১ ॥ ওঁ অনর্ব্বিরাতিং বসুদমুপস্তুহি ভদ্রা ইন্দ্রস্য রাতয়ঃ। সোহস্য কামং বিধতো নরোষতি মনো দানায় চোদয়ন্। পঠিত্বা অনেন গন্ধেন ইতি ॥ ২ ॥ ওঁ ইন্দ্রা পর্ব্বতা বৃহতা রথেন বামী বর্ষ আবাহতং সুবীরাঃ। ইতি পঠিত্বা অনয়া শিলয়া ইতি ॥ ৩ ॥ ওঁ ধানাবন্তং করম্ভিনমপূপবন্তমুক্থিনং ইন্দ্রপ্রাতর্জুষস্ব নঃ। ইতি পঠিত্বা অনেন ধান্যেন ইতি ॥ ৪ ॥ ওঁ যজ্জা যথা অপূর্ব্ব মঘবন্ বৃত্রহত্যায় তৎ পৃথিবীমপ্রথয় সস্তভ্না উতো দিবং। ইতি পঠিত্বা অনয়া দূর্ব্বয়া ইতি ॥ ৫ ॥ ওঁ পবমানস্য বশ্নুহি রশ্মিভির্বাজসাতমঃ। দধৎ স্তোত্রে সুবীর্য্যং ইতি পঠিত্বা অনেন পুষ্পেণ ইতি ॥ ৬ ॥ ওঁ ইন্দ্রস্যরোণে মথিতা হবন্তে যৎ পর্য্যায্য নয়তে ধিয়স্তাঃ শূরো নৃষাতাঃ শ্রবসশ্চকাম অগোমতি ব্রজে ভজাত্বন্নঃ। ইতি পঠিত্বা অনেন ফলেন ইতি ॥ ৭ ॥ ওঁ দধিক্রাব্নোহকার্ষং জিষ্ণোরশ্বস্য বাজিনঃ সুরভিনো মুখাকরোৎ প্রণতায়ুংষি তারিষৎ। ইতি পঠিত্বা অনেন

অথাধিবাসনং। স্বস্তিবাচনং কৃত্বা এতে গন্ধপুষ্পে ওঁ আদিত্যাদিনবগ্রহেভ্যো নমঃ। ইতি সংপূজ্য সঙ্কল্পং কুর্য্যাৎ। যথা বিষ্ণুরোঁ। তৎসদদ্যামুকমাসেঽমুকপক্ষে ঽমুকতিথৌ অমুকগোত্রস্যামুকদেবশর্ম্মণঃ শুভামুককর্ম্মাঙ্গভূত গণপত্যাদি দেবতা ষষ্ঠীমার্কণ্ডেয় পূজাপূর্ব্বকং শুভাধিবাসনমহং করিষ্যামি ইতি সঙ্কল্প সূক্তং পঠিত্বা শালগ্রামে ঘটে বা গণেশাদীন্ সংপূজ্যাধিবাসং কুর্য্যাৎ। যথা মহী গন্ধঃ শিলা ধান্যং দূর্ব্বা পুষ্পং ফলং দধি। ঘৃতং স্বস্তিকসিন্দূরং শঙ্খকজ্জলরোচনাঃ। সিদ্ধার্থং কাঞ্চনং রৌপ্যং তাম্রং চামরদর্পণং। দীপঃ প্রশস্ত পাত্রঞ্চ বন্দনীয়াঃ শুভে দিনে। যথা ওঁ মহিত্রীণামবরস্তু দ্যুক্ষং মিত্রস্যার্য্যম্ণো দুরাধর্ষং বরুণস্য। ইতি পঠিত্বা অনয়া মহ্যা অস্য শুভাধিবাসনমস্তু। ইতি ক্রমেণ বিষ্ণৌ স্পর্শনং ভূমাবতারণং সংস্কার্য্য-শিরসি নিধানমিতি ॥ ১ ॥ ওঁ অমর্ষিরাতিং বসুদমুপস্তুহি ভদ্রা ইন্দ্রস্য রাতয়ঃ। সোঽস্য কামং বিদধতো নরোষতি মনো দানায় চোদয়ন্। পঠিত্বা অনেন গন্ধেন ইতি ॥ ২ ॥ ওঁ ইন্দ্রা পর্ব্বতা বৃহতা রথেন বামী বর্ষ আবাহতং সুবীরাঃ। ইতি পঠিত্বা অনয়া শিলয়া ইতি ॥ ৩ ॥ ওঁ ধানাবন্তং করম্ভিনমপূপবন্তমুক্থিনং ইন্দ্রপ্রাতর্জুষস্ব নঃ। ইতি পঠিত্বা অনেন ধান্যেন ইতি ॥ ৪ ॥ ওঁ যজ্জা যথা অপূর্ব্ব মঘবন্ বৃত্রহত্যায় তৎ পৃথিবীমপ্রথয় সস্তভ্না উতো দিবং। ইতি পঠিত্বা অনয়া দূর্ব্বয়া ইতি ॥ ৫ ॥ ওঁ পবমানস্য বিশ্নুহি রশ্মিভির্বাজসাতমঃ। দধৎ স্তোত্রে সুবীর্য্যং ইতি পঠিত্বা অনেন পুষ্পেণ ইতি ॥ ৬ ॥ ওঁ ইন্দ্রনরোনেমধিতা হবন্তে যৎ পার্য্যাযু নয়তে ধিয়স্তাঃ শূরো নৃষাতাঃ শ্রবসশ্চকাম অগোমতি ব্রজে ভজাত্বন্নঃ। ইতি পঠিত্বা অনেন ফলেন ইতি ॥ ৭ ॥ ওঁ দধিক্রাব্ণোঽকার্ষং জিষ্ণোরশ্বস্য বাজিনঃ সুরভিনো মুখাকরোৎ প্রণতায়ুংষি তারিষৎ। ইতি পঠিত্বা অনেন ১২৭

ভূরি রেতসা (তেজসা)। ইতি পঠিত্বা অনেন ঘৃতেন ইতি ॥ ৯ ॥ ওঁ অস্তি সোমোঽয়ং সুতঃ পি[illegible]ন্ত্যস্য মরুতঃ। [illegible]তঃ স্বরাজো
ঽশ্বিনা। ইতি পঠিত্বা অনেন স্বস্তিকেন ইতি ॥ ১০ ॥ ওঁ সিন্ধোরুচ্ছাসে পতয়ন্তমুক্ষণং হিরণ্যপাবাঃ পশুমপ্সু গৃভ্ণতে।
ইতি পঠিত্বা অনেন সিন্দূরেণ ইতি ॥ ১১ ॥ ওঁ সমুদ্রেয়ো বসূনাং যো রায়ামানেতায় ইড়ানাং সোমায় সুক্ষিতীয়াং। ইতি
পঠিত্বা অনেন শঙ্খেনেতি ॥ ১২ ॥ ওঁ অঞ্জতে ব্যঞ্জতে সমঞ্জতে ক্রতুং রিহন্তি মধ্বাভ্যঞ্জতে। ইতি পঠিত্বা অনেন কজ্জ-
লেন ইতি ॥ ১৩ ॥ ওঁ অধদ্যাঽধবা দিবো বৃহতো রোচনাদধি অজাবন্ধসুতন্নাগিরা সমাজাতা সুক্রতোপৃণ। ইতি পঠিত্বা
অনয়া রোচনয়া ইতি ॥ ১৪ ॥ ওঁ এযোষা অপূর্ব্ব্যা ব্যুৎসিতি প্রিয়াদি বস্তবে বামশ্বিনা বৃহৎ। ইতি পঠিত্বা অনেন সিদ্ধার্থেন
ইতি ॥ ১৫ ॥ ওঁ তং গৃর্দ্ধায়াস্বুবন্নবোঽবদেবাসো দেবমরতিং দধাহোন্নিবে। দেবতা হব্যমূহিসঃ। ইতি পঠিত্বা অনেন কাঞ্চ-
নেনেতি ॥ ১৬ ॥ ওঁ যদ্বর্চ্চো হিরণ্যস্য যদ্বা বর্চ্চো গবামুত। সত্যস্য ব্রহ্মণো বর্চ্চস্তেন মা সংসৃজামসি। ইতি পঠিত্বা অনেন
য়জতেতেনেতি ॥ ১৭ ॥ ওঁ বনমহাং সূর্য্যবড়াদিত্যমহাং অসিং। মহস্তে সতো মহিমাপনিষ্টম মহ্না দেবমহাং অসি। ইতি
পঠিত্বা অনেন তাম্রেণেতি ॥ ১৮ ॥ ওঁ বাত অবাত ভেষজং শম্ভুময়োভুনো হৃদি প্রণতায়ুংষি তার্ষৎ। ইতি পঠিত্বা অনেন চাম-
রেণ ইতি ॥ ১৯ ॥ ওঁ আদিত্যপ্রত্নস্য রেতসো জ্যোতিঃ পশ্যন্তি বাসরং পরো যদিধ্যতে দিবি ॥ ইতি পঠিত্বা অনেন দর্পণেন
ইতি ॥ ২০ ॥ ওঁ মনো জ্যোতির্জুষতামাজ্যস্য বৃহস্পতির্যজ্ঞমিমং তনোত্বারিষ্টং যজ্ঞং সমিমং দধাতু। বিশ্বেদেবাস ইহ মাদয়ন্তা-
মোং প্রতিষ্ঠ ইতি পঠিত্বা অনেন দীপেনেতি ॥ ২১ ॥ ওঁ প্রতিপদসি প্রতিপদে ত্বা অনুপসি অনুপদে ত্বা সম্পদসি সম্পদে
ত্বা তেজোসি তেজসে ত্বা। ইতি পঠিত্বা অনেন প্রশস্ত বন্দনপাত্রেণ ইতি ॥ ২২ ॥ * ॥ ইতি অধিবাসঃ সমাপ্তঃ ॥ * ॥

ওঁ নমো গণেশায়। শাস্ত্রজ্ঞানবিবেকনির্ম্মলধিয়াং প্রজ্ঞাবতামগ্রণীঃ পাণ্ডিত্যেন বিখণ্ডিতামরগুরুঃ প্রাজ্ঞোঽতিসুজ্ঞঃ স্মৃতৌ। বিপ্রাণান্দশকর্ম্মপদ্ধতিমিমামুদ্ধৃত্য বেদাদসৌ চক্রে ভূপতিপণ্ডিতঃ পশুপতিঃ স্বর্গাপবর্গপ্রদাং। অথ যজুর্ব্বেদিনাং দশকর্ম্মপদ্ধতির্লিখ্যতে। তত্রাদৌ বিবাহকর্ম্মাভিধীয়তে। ততঃ কতিপয় দিবসভাবিনি বিবাহে স্ব্যাচারসিদ্ধমবিঘ্নকর্ম্মাদিকং কৃত্বা পূর্ব্বোক্ত কালে বিবাহলগ্নদিবসং বা প্রতির্নির্বর্ত্তিতনিত্যকৃত্যো বরপিতা কন্যাপিতা চ গৌর্য্যাদিষোড়শমাতৃকাপূজা বৃদ্ধিশ্রাদ্ধঞ্চ কুর্য্যাৎ। ততঃ শুভে মুহূর্ত্তে হস্তোদকার্থং যথা স্ব্যাচারসিদ্ধং ফলকুসুমাদিকং গৃহীত্বা ব্রাহ্মণাদয়ো জামাতৃগৃহং গচ্ছেয়ুঃ। তত্র গত্বা পশ্চিমাভিমুখঃ কন্যাসম্বন্ধী ব্রাহ্মণঃ পূর্ব্বাভিমুখবরসম্বন্ধিব্রাহ্মণায় সতিলকুশোদকৈর্হস্তোদকং দদ্যাৎ॥ ততঃ ওঁ অদ্যেত্যাদি শুভে লগ্নে অমুক গোত্রস্য অমুক প্রবরস্য অমুক দেবশর্ম্মণঃ প্রপৌত্রস্য অমুক গোত্রস্য অমুক প্রবরস্য অমুক দেবশর্ম্মণঃ পৌত্রস্যামুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রস্য অমুক গোত্রস্যামুক প্রবরস্যামুকদেবশর্ম্মণঃ অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রীং অমুক গোত্রাং অমুকপ্রবরাং শ্রীমতী অমুকী দেব্যভিধানাং কন্যাং শুভবিবাহেন দাতুং তবাহং জানে॥ ইতি জামাতা বাঢ়মিতি ব্রূয়াৎ। ততঃ শুভে লগ্নে স্ব্যাচারসিদ্ধং উরো হস্তাদিকং কৃত্বা বাসগৃহং নীত্বা স্বস্তিবাচনং কৃত্বা ঊর্দ্ধস্থিতং বরং প্রতি কন্যাদাতা বদেৎ। ওঁ সাধু ভবানাস্তাং। ওঁ সাধ্বহমাসে ইতি বরঃ। ওঁ অর্চ্চয়িষ্যামো ভবন্তং ইতি কন্যাদাতা। ওঁ অর্চ্চয়েতি বরঃ। ততঃ পাদ্যার্ঘ্যাচমনীয়গন্ধপুষ্পমাল্যবস্ত্রালঙ্কারফলতাম্বূলাদিকং দত্ত্বা দক্ষিণং জানু বিধৃত্য বরয়েৎ। যথা অদ্যেত্যাদি অমুক গোত্র- ১২৯

স্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রং অমুক গোত্রং অমুক প্রবরং শ্রীঅমুক দেবশর্ম্মাণং বরং। অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুকদেবশর্ম্মণঃ পুত্রীং অমুক গোত্রাং অমুক প্রবরাং শ্রী অমুকী দেব্যভিধানাং কন্যাং শুভবিবাহায় দাতুং ভবন্তমহং বৃণে। ওঁ বৃতোঽস্মীতি বরঃ। যথাবিহিতং বিবাহকর্ম্ম কুরু ইতি কন্যাদাতা। যথাজ্ঞানতঃ করবাণীতি বরঃ। ততো মুখচন্দ্রিকাং কৃত্বা বাসগৃহং নীত্বা বিষ্টরাদিকং দদ্যাৎ। যথা কন্যাদাতা ওঁ বিষ্টরো বিষ্টরো বিষ্টরঃ প্রতিগৃহ্যতাং ইতি বদেৎ। ওঁ বিষ্টরং প্রতিগৃহ্ণামীতি বরঃ। ওঁ বর্ষ্মোঽস্মি সমানানামুদ্যতামিব সূর্য্যঃ। ইমন্তমভিতিষ্ঠামি যো মাকশ্চাভিদাসতি। ইত্যনেন বিষ্টরাসনে উপবিশতি। ততঃ পাদয়োরন্যং দদ্যাৎ তেনৈব মন্ত্রেণ। ততঃ কন্যাদাতা। ওঁ পাদ্যং পাদ্যং পাদ্যং প্রতিগৃহ্যতাং। বরঃ পাদ্যং প্রতিগৃহ্ণামীতি গৃহীত্বা ভূমৌ সংস্থাপ্য ততঃ এবাঞ্জলিং গৃহীত্বা ওঁ বিরাজো দোহোঽসি বিরাজো দোহমশীয় ময়ি পাদ্যায়ৈ বিরাজো দোহঃ। ইত্যনেন দক্ষিণপাদে দদ্যাৎ। শূদ্রশ্চেদ্বামে। পুনস্তথৈবাঞ্জলিং গৃহীত্বা তেনৈব মন্ত্রেণ বামপাদে দদ্যাৎ। ততঃ কন্যাদাতা ওঁ অর্ঘ্যো ঽর্ঘ্যো ঽর্ঘঃ প্রতিগৃহ্যতাং ইতি ব্রূয়াৎ। ততো ঽর্ঘ্যং প্রতিগৃহ্ণামীত্যুক্ত্বা ওঁ আপস্থ যুষ্মাভিঃ সর্ব্বান্ কামানবাপ্নুবামি। ইত্যনেন মন্ত্রেণ বরস্তূষ্ণীমেব শিরসা বিধৃত্য তদর্ঘ্যজলং ত্যজন্নিমং মন্ত্রং পঠেৎ। ওঁ সমুদ্রং বঃ প্রহিণোমি স্বাং যোনিমভিগচ্ছত। অরিষ্টা অস্মাকং বীরামা পরাসেচি মৎ পয়ঃ। ততঃ কন্যাদাতা আচমনার্থং জলং গৃহীত্বা ওঁ আচমনীয়মাচমনীয়মাচমনীয়ং প্রতিগৃহ্যতাং

ইত্যুক্ত্বা আচমনীয়ং দদাতি। ততো বরঃ ওঁ আচমনীয়ং প্রতিগৃহ্লামীতি গৃহীত্বা ওঁ আমাগন্যশসাসহঁসৃজ বর্চ্চসা তং মা
কুরু প্রিয়ং প্রজানামধিপতিং পশূনামরিষ্টং তনূনাং ইত্যাচামতি। ততঃ কন্যাদাতা কাংস্যপাত্রস্থানি দধিমধুঘৃতানি কাংস্য-
পাত্রান্তরপিহিতানি গৃহীত্বা ওঁ মধুপর্কো মধুপর্কো মধুপর্কঃ প্রতিগৃহ্যতাং ইতি ব্রূয়াৎ। ততো বরঃ ওঁ মধুপর্কং প্রতিগৃহ্লামীতি
গৃহীত্বা দাতৃহস্তস্থিতমেব মধুপর্কং পিধায় কাংস্যপাত্রং কিঞ্চিদপনীয় ওঁ মিত্রস্য ত্বা চক্ষুষা প্রতীক্ষে ইত্যনেন নিরীক্ষ্য ওঁ দে-
বস্য ত্বা সবিতুঃ প্রসবেঽশ্বিনোর্ব্বাহুভ্যাং পুষ্ণো হস্তাভ্যাং হস্তমাদদে। ইত্যনেন গৃহীত্বা স্ববামহস্তে নিধায় পিধানকাংস্যমপনীয়
ওঁ নমস্যা বাস্যায়ান্য শনেয়ত্তু আবিদ্ধং তত্তে নিষ্কৃন্তামি। ইত্যনেন দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং ত্রিরালোড্য ভূষ্ণীমঙ্গুল্যগ্রেণ
কিঞ্চিত্রিস্ত্যজতি। তদনু তত্রৈব ত্রিঃ প্রাশ্নাতি। যন্মধু নো মধব্যং পরমং রূপমন্নাদ্যং তেনাহং মধু নো মধব্যেন পরমেণ রূপে-
ণান্নাদ্যেন পরমো মধব্যোঽন্না দোষাণি ইত্যনেন ত্রিঃ প্রাশ্য শেষং পূর্ব্বপ্রদেশে ত্যজেৎ। পুত্রায় শিষ্যায় বা দদ্যাৎ। ততঃ আ-
চম্য প্রাণস্থানানি স্পৃশেৎ। ওঁ বাঙ্ম আস্যে হস্ত ইতি মুখং। ওঁ নসোঃ প্রাণো মে হস্ত ইতি নাসিকাং। ওঁ অক্ষোশ্চক্ষুর্ম্মেঽস্ত্ত
ইতি চক্ষুষী। ওঁ কর্ণয়োঃ শ্রোত্রং মে হস্ত ইতি কর্ণৌ। ওঁ বাহ্বোর্ব্বলং মে হস্ত ইতি বাহূ। ওঁ উর্ব্বো রোজো মে হস্ত ইতি
ঊরূ। অরিষ্টানি মে হঙ্গানি তনূস্তন্বা মে সহ সন্তু ইতি শিরঃপ্রভৃতি পাদপর্য্যন্তং স্পৃশেৎ। ততঃ আচান্তে বরে কন্যাদাতা খড়্গাং
গৃহীত্বা গামবস্থাপয়েৎ। ততো নাপিতে। গৌর্গৌরিতি ত্রিঃ প্রাহ। ততো বরস্তাং মোচয়তি। ওঁ মাতা রৌদ্রাণাং দুহিতা
বসূনাং স্বসাদিত্যানামমৃতস্য নাভিঃ। প্রণু বোচং চিকিতুষে জনায় মা গামনাগামদিতিং বধিষ্ঠ। মম চামুষ্য চ পাপ্মা হত

সমুৎসৃজতু তৃণান্যত্ত্বু ইত্যনেন মন্ত্রেণ অনুমোদতি কন্যাদাতুর্নামাতিদেশঃ। ততো বরঃ ছায়ামণ্ডপং গত্বা পূর্ব্বাভিমুখো ঽগ্নিস্থাপনং
কুর্য্যাৎ। তত্র হস্তপ্রমাণং স্থণ্ডিলং কুশেন তূষ্ণীং ত্রিঃ সংমৃজ্য গোময়েন তূষ্ণীং ত্রিরুপলিপ্য স্ফ্যেন কুশমূলেন তূষ্ণীং পূর্ব্বা-
গ্রেরেখাত্রয়ং কৃত্বা অঙ্গুষ্ঠতর্জ্জনীভ্যাং তত্রোৎকীর্ণ মৃত্তিকাং ত্রিরুদ্ধৃত্য জলেন তূষ্ণীং ত্রিরভ্যুক্ষ্যাত্মদক্ষিণে ঽগ্নিমানীয় জ্বলদিন্ধনেন
ক্রব্যাদমগ্নিং ত্যজেৎ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। ইত্যনেন মন্ত্রেণ। ওঁ ইহৈবায়মিতরো
জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্। ইতি মন্ত্রেণ আত্মসম্মুখে তূষ্ণীং স্থণ্ডিলে ঽগ্নিমারোপয়েৎ। ওঁ পিঙ্গভ্রূঃ শ্মশ্রুকে-
শাক্ষঃ পীনাঙ্গ জঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ। ইতি ধ্যাত্বা যোজকনামানমগ্নিং দত্ত্বা পূজ-
য়েৎ। ততো বাসগৃহং গত্বা কন্যাং বাসঃ পরিধাপয়েৎ। ওঁ জরাগচ্ছ পরিধৎস্ব বাসো ভবা কৃষ্টীনামভিশস্তিপাবা। শতঞ্চ
জীব শরদঃ সুবর্চ্চা রয়িঞ্চ পুত্রামনুসংব্যয়স্বায়ুষ্মতীদং পরিধৎস্ব বাসঃ। ওঁ যা অকৃন্তন্নবয়ন্ যা অতন্বত যাশ্চ দেবীস্তন্তূনভি-
তো ঽততন্থ। তাস্ত্বা দেবীর্জরসে সংব্যয়স্বায়ুষ্মতীদং পরিধৎস্ব বাসঃ। ইতি মন্ত্রেণ কন্যায়া উত্তরীয়ং পরিধাপয়েদ্বরঃ। অথ
কন্যাদাতা পূর্ব্বাভিমুখোপবিষ্টবরাগ্রতঃ পশ্চিমাভিমুখ উপবিশতি। কন্যাঞ্চ পশ্চিমাভিমুখীং ক্রোড়স্থানে উপবেশ্য কন্যাবর-
য়োরন্যোন্যমুখনিরীক্ষণং কারয়তি। ততঃ কন্যাদাতা কন্যাবরৌ প্রতিপ্রৈষ্য ওঁ সমী ভবেথামিতি অন্যোন্যমুখাবলোকনে
সতি বরঃ পঠতি। ওঁ সমঞ্জন্তু বিশ্বে দেবা সমাপো হৃদয়ানি নৌ। সম্মাতরিশ্বা সন্ধাতা সমুদেষ্ট্রী দধাতু নৌ। কন্যাপ্রদক-
র্ত্তৃকং গ্রন্থিবন্ধনং। ততঃ কন্যাদাতা ওঁ সাচ্ছাদনালঙ্কৃতায়ৈ কন্যায়ৈ নমঃ। ইতি ত্রিরভ্যর্চ্চ্য এতৎসম্প্রদানায় ওঁ বরায় নমঃ।

এতদধিপতয়ে ওঁ প্রজাপতয়ে নমঃ। ততঃ প্রোক্ষণং কৃত্বা তিলকুশজলং গৃহীত্বা সম্প্রদদ্যাৎ। অদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমুক
দেবশর্ম্মা মহাভারতোক্ত কন্যাদানফলপ্রাপ্তিকামঃ অমুক গোত্রস্যামুক প্রবরস্যামুকদেবশর্ম্মণঃ প্রপৌত্রায় অমুক গোত্রস্যামুক প্রবর-
স্যামুক দেবশর্ম্মণঃ পৌত্রায় অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রায় অমুক গোত্রায় অমুকপ্রবরায় শ্রী অমুক দেবশর্ম্মণে বরায়
অর্চ্চিতায়। অমুক গোত্রস্যামুকপ্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং অমুক গোত্রস্যামুকপ্রবরাস্যামুক দেবশর্ম্মণঃ পৌত্রীং অমুকগোত্রস্যামুক
প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রীং অমুক গোত্রাং অমুক প্রবরাং শ্রীমতী অমুকী দেব্যভিধানাং। এবং অমুক গোত্রস্যামুক প্রবরস্যামুক
দেবশর্ম্মণঃ প্রপৌত্রায় অমুক গোত্রস্যামুকপ্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রায় অমুক গোত্রস্যামুকপ্রবরস্যামুক দেবশর্ম্মণঃ পুত্রায় অমুক
গোত্রায়ামুক প্রবরায় অমুক দেবশর্ম্মণে বরায় অর্চ্চিতায়। অমুকগোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং অমুক গোত্রস্যা-
মুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রীং অমুক গোত্রাং অমুক প্রবরাং শ্রীমতী অমুকী-
দেব্যভিধানাং কন্যাং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রায় অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রায় অমুক
গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পুত্রায় অমুক গোত্রায়ামুক প্রবরায়ামুক দেবশর্ম্মণে বরায় অর্চ্চিতায় তুভ্যং। অমুক গোত্রস্যামুক
প্রবরস্যামুক দেবশর্ম্মণঃ প্রপৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ পৌত্রীং অমুক গোত্রস্যামুক প্রবরস্যামুক দেবশর্ম্মণঃ
পুত্রীং অমুক গোত্রাং অমুকপ্রবরাং শ্রীমতী অমুকীদেব্যভিধানাং কন্যাং সালঙ্কৃতাং বাসোযুগাচ্ছাদিতাং প্রজাপতিদৈবতাকামহং সংপ্র-
দদে। ইতি কন্যাহস্তসহিতপূর্ব্বগৃহীতজলং বরহস্তে দদ্যাৎ। ততো বরঃ স্তবীত্যুক্ত্বা গায়ত্রীঞ্চ পঠেৎ। ততঃ কন্যাদাতা ওঁ কন্যেয়ং

প্রজাপতিদেবতাকা ইত্যভিধায়। ততো বরঃ কামস্তুতিং পঠেৎ। ওঁ কো ইদাৎ কস্মা অদাৎ কামো ইদাৎ কামায়াদাৎ কামো দাতা কামঃ প্রতিগৃহীতা কামৈতত্তে কামসতা তু নজামহৈ ইতি পঠিত্বা ওঁ দ্যৌস্ত্বা দদাতু পৃথিবী ত্বা গৃহ্নাতু। ইতি পঠেৎ। ততঃ কশ্চিদন্যো ব্রাহ্মণঃ হস্তলেপদ্রব্যেণ বধূবরয়োর্হস্তলেপং দদ্যাৎ। সহদেবাময়ূরশিখা বিষ্ণুক্রান্তা শতপুষ্পা মোহিনী-সর্জ্জরসশিক্‌থ কুঙ্কুমচন্দনগুঞ্জকর্পূরমদনকোষমধুপুষ্পকাকোলীলতাকস্তূরীজাতিফলর্দ্ধিবৃদ্ধিকাকোলীমেদমহামেদজীবকবৎসকম্বৈতৈঃ। প্রত্যেকমাসকপ্রমাণৈর্জামাতৃহস্তোপরি বধূহস্তমাদায় গায়ত্র্যা মন্ত্রেণ কুশবেণ্যা বধ্নীয়াৎ। ততো দক্ষিণান্দদ্যাৎ। অদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা মহাভারতোক্ত ফল প্রাপ্তিকামনয়া কৃতৈতৎ কন্যাদানপ্রতিষ্ঠার্থং দক্ষিণামিদং সুবর্ণং অমুক গোত্রায়ামুক প্রবরায় শ্রী অমুকদেবশর্ম্মণে বরায় অর্চ্চিতায় তুভ্যমহং সম্প্রদদে। বরঃ স্বস্তীত্যুক্ত্বা গৃহ্নীয়াৎ। এবং যথাশক্তি ভূমি-শয্যাদাসাদিকং দদ্যাৎ। ততো বরঃ কন্যায়া উত্তরীয় বস্ত্রদশয়া ক্রোড়াঞ্চলেন গায়ত্র্যা গ্রন্থিমাবধ্নীয়াৎ। ততঃ কশ্চিদন্যো ব্রাহ্মণো বধূবরয়োর্হস্তগ্রন্থিং গায়ত্র্যা মোচয়েৎ। ততো বরঃ কন্যাহস্তং গৃহীত্বা নিষ্ক্রময়তি। ওঁ যদৈষি মনসা দূরং দিশোঽনু পবমানো বা হিরণ্যবর্ণো বৈকর্ণঃ সত্বমন্মসাং করোম্যসৌ। অসাবিতি সর্ব্বনামস্থানে বধূনাম কার্য্যং। ততো বধূসহিতো বরঃ পূর্ব্বস্থাপিতাগ্নেঃ পশ্চিমং গত্বা স্থিতো ভবতি। ততঃ কন্যাপিতা তৌ সমীক্ষয়তি ওঁ অন্যোন্যং সমীক্ষেথাং। ইতি তৌ প্রতি প্রৈষেণ তয়োরন্যোন্যমুখাবলোকনে সতি বরঃ পঠতি। ওঁ অঘোরচক্ষুরপতিঘ্ন্যেধি শিবা পশুভ্যঃ সুমনাঃ সুবর্চ্চা বীরসূর্দ্দেব কামাশন্নোভবদ্বিপদেশঞ্চতুষ্পদে। ওঁ সোমঃ প্রথমো বিবিদে গন্ধর্ব্বো বিবিদ উত্তরস্তৃতীয়াঽগ্নিষ্টেপতি-

স্তুরীয়স্তে মনুষ্যজাঃ। সোমোঽদদদ্গন্ধর্ব্বায় গন্ধর্ব্বোঽদদদগ্নয়ে রয়িঞ্চ পুত্রাং শ্চাদাদগ্নির্ম্মহ্যমথো ইমাং। ওঁ সা নঃ পূষা-
শিবতমা মৈরয়ৎ সা ন উরূ। উষতীরিহ বয়স্যামুযন্তুঃ প্রহবাম শেফয়স্যামুকা বহবো নিবিষ্টে। ইতি মন্ত্রেণ বধূবরয়ো-
র্নিষ্ক্রমণাদারভ্যাভিষেকং যাবৎ চন্দনচর্চ্চিতং চূতপল্লবাস্যমুদককুম্ভং ব্রাহ্মণঃ স্কন্ধে কৃত্বা বাগ্যতস্তিষ্ঠেৎ। ততো বস্ত্রবেষ্টিতং
তৃণপুলকং দক্ষিণপাদেন সঞ্চাল্য হোমার্থমুপবিশতি বধূশ্চ তত্রৈব দক্ষিণে উপবিশতি। ততো বরো যথাশক্তি গন্ধাদিনা
ব্রাহ্মণং বরয়েৎ। ওঁ অদ্যেত্যাদি অমুক বেদান্তর্গতামুক শাখৈকদেশাধ্যায়িনং শ্রী অমুক দেবশর্ম্মাণং মদীয় বিবাহহোমকর্ম্মণি ব্রতকর্ম্ম-
কর্ত্তুমেভির্গন্ধাদিভিরভ্যর্চ্চ্য ব্রহ্মত্বেন ভবন্তমহং বৃণে। ওঁ বৃতোঽস্মীতি ব্রহ্মা। যথাবিহিতং ব্রহ্মকর্ম্ম কুরু ইতি বরঃ। যথা-
জ্ঞানতঃ করবাণীতি ব্রহ্মা। ততো ঽগ্নের্দক্ষিণে প্রাগগ্রকুশসমেতং ব্রহ্মাসনমাস্তীর্য্য তত্র ব্রহ্মন্নিহোপবিশ্যতামিতি ব্রহ্মাণমুপবেশ্য ১০
অগ্নেরুত্তরে প্রণীতা প্রণয়নং কৃত্বা সকৃদছিন্ন কুশেন ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেনাগ্নিং পরিস্তীর্য্য অগ্নেরুত্তরে প্রয়োজন-
দ্রব্যং দক্ষিণাদিতো যথাক্রমমাসাদয়েৎ। তদ্‌যথা পবিত্রচ্ছেদনানি পবিত্রে দ্বে প্রোক্ষণীপাত্রং আজ্যস্থালী সম্মার্জ্জনকুশাঃ ষট্
উপযমনকুশাস্ত্রয়োদশ প্রাদেশপ্রমাণং সমিত্রয়ং শ্রুবমাজ্যং তণ্ডুলাশ্চ ব্রহ্মদক্ষিণা। তথাভিষেকার্থচূতপল্লবাস্যোদকপূর্ণঘটঃ। তথা
শূর্পস্থ শমীপত্রমিশ্রিতান্ লাজান্ সপুত্র শিলালোহিতবলীবর্দ্দচর্ম্মাণ্যাসাদয়েৎ। ততঃ পূর্ব্বাসাদিত পবিত্রছেদনকুশেন প্রাদেশপ্র-
মাণং ছিত্ত্বা প্রোক্ষণীপাত্রে দত্ত্বা তত্র প্রণীতাজলং নিধায় বামহস্ততলে প্রোক্ষণীপাত্রং স্থাপয়িত্বা কতিপয় প্রোক্ষণী জলেন
প্রোক্ষণীপাত্রং অন্যানি চ পাত্রাণি সংপ্রোক্ষ্য প্রণীতাদক্ষিণে ঽসঞ্চরে প্রোক্ষণীপাত্রং স্থাপয়েৎ। আজ্যস্থালীমাত্মসম্মুখমানীয় পূর্ব্বা-

সাদিতমাজ্যং তস্যাং নিরূপ্য চতুর্থ্যাং চরুস্থাল্যাং প্রণীতোদকং দত্ত্বা মোদকচরৌ আসাদিত তণ্ডুলাংশ্চ দত্ত্বা আজ্যমগ্নের্দ্দক্ষিণে ইধিশ্রিয়েৎ। পর্য্যগ্নিকরণায় জ্বলদগ্নিং গৃহীত্বা ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেনাজ্যস্থালীং চরুঞ্চ ত্রিঃ পরিবেষ্ট্য তমগ্নিং তত্রৈবাগ্নৌ ক্ষিপেৎ। ততঃ পূর্ব্বসাদিতং শ্রুবং গৃহীত্বা অধোমুখমগ্নৌ প্রতপ্য চরুঞ্চ তদুত্তরে আসাদিতং সম্মার্জ্জনকুশেন মূলাদগ্রং পুনরগ্রান্মূলং যাবৎ সংমৃজ্য সম্মার্জ্জনকুশং পরিত্যজ্য প্রণীতোদকেনাভুক্ষ্য পুনস্তত্রৈব শ্রুবং প্রতপ্য প্রোক্ষণ্যুত্তরে স্থাপয়েৎ। ততঃ আজ্যস্থালীমাত্মসম্মুখে চরুঞ্চ তদুত্তরে অবতার্য্য প্রোক্ষণীপাত্রস্থং পবিত্রং গৃহীত্বা আজ্যস্য কিঞ্চিদুত্তোলন-রূপমুৎপবনং কৃত্বা আজ্যমবেক্ষেৎ। প্রোক্ষণীজলঞ্চ তৎ পবিত্রং তত্রৈব স্থাপয়িত্বা উপযমন কুশান্ বামহস্তেন গৃহীত্বা পূর্ব্বা-সাদিত সমিত্ত্রয়মুত্তিষ্ঠন্নগ্নৌ প্রক্ষিপ্য উপবিশ্য প্রোক্ষণীপাত্রস্থং সপবিত্রং জলং গৃহীত্বা তজ্জলেনৈশানাদিত্তো দক্ষিণাবর্ত্তেনাগ্নিং পর্য্যুক্ষেৎ। ওঁ এষো হি দেবঃ প্রদিশোনু সর্ব্বাঃ পূর্ব্বোহজাতঃ ষড়্ গর্ভেহন্তঃ স এব জাতঃ স জনিষ্যমানঃ প্রত্যঙ্ঙনাস্তিষ্ঠতি সর্ব্বতো মুখঃ। ইতি মন্ত্রেণ সম্মুখীকরণং। ততঃ পবিত্রং প্রণীতায়াং নিধায় প্রোক্ষণীপাত্রং সংশ্রবার্থমগ্নেরুত্তরে স্থাপয়েৎ। ততো যজমানো হস্বারম্ভপূর্ব্বকং শ্রুবং গৃহীত্বা আজ্যেনাঘারাজ্যভাগৌ জুহুয়াৎ। তত্রাঘারৌ ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজা-পতয়ে। ইতি দেবতোদ্দেশং কৃত্বা তুষ্ণীং জুহুয়াৎ। হুত্বা হুত্বা শ্রুবলগ্নং হবিঃ শেষং প্রাশনার্থমগ্নেরুত্তরে স্থাপয়েৎ। ওঁ ইন্দ্রায় স্বাহা ইদমিন্দ্রায়। ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ওঁ সোমায় স্বাহা ইদং সোমায়। ততঃ প্রকৃতং কর্ম্ম। অজ্যেনৈব য়াষ্ট্র-ভৃদ্ধোমঃ। দ্বাদশ মন্ত্রা যথা। ওঁ ঋতাষাড়্ ঋতধামাগ্নির্গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট। ইদমৃতাষাহে ঋত- ১১৬

ধাম্নে ঽগ্নয়ে গন্ধর্ব্বায় ॥ ১ ॥ ওঁ ঋতাষাড়ৃতধামাগ্নির্গন্ধর্ব্বঃ। তস্যৌষধয়োঽপ্সরসো মুদোনাম তাভ্যঃ স্বাহা। ইদমোষধিভ্যো ঽপ্সরোভ্যো মুদভ্যঃ ॥ ২ ॥ ওঁ সংগুঁহিতো বিশ্বসামা সূর্য্যো গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট্। ইদং সংহি- তায় বিশ্বসাম্নে সূর্য্যায় গন্ধর্ব্বায় ॥ ৩ ॥ ওঁ সংগুৎহিতো বিশ্বসামা সূর্য্যো গন্ধর্ব্বঃ। তস্য মারীচয়োঽপ্সরস আয়ুসো নাম তাভ্যঃ স্বাহা। ইদং মারীচিভ্যোঽপ্সরোভ্য আয়ুভ্যঃ ॥ ৪ ॥ ওঁ সুসুম্নঃ সূর্য্যরশ্মিশ্চন্দ্রমা গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট্। ইদং সুসুম্নায় সূর্য্যরশ্ময়ে চন্দ্রমসে গন্ধর্ব্বায় ॥ ৫ ॥ ওঁ সুসুম্ন সূর্য্যরশ্মিশ্চন্দ্রমা গন্ধর্ব্বঃ। তস্য নক্ষত্রাণ্যপ্সরসো ভেকুরয়ো নাম তাভ্যঃ স্বাহা। ইদং নক্ষত্রেভ্যোঽপ্সরোভ্যো ভেকুরিভ্যঃ ॥ ৬ ॥ ওঁ ইষিরো বিশ্বব্যচা বাতো গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট্। ইদমিষিরায় বিশ্বব্যচসে বাতায় গন্ধর্ব্বায় ॥ ৭ ॥ ওঁ ইষিরো বিশ্বব্যচা বাতো গন্ধর্ব্বঃ। তস্যাপ্সরস উর্জ্জো নাম তাভ্যঃ স্বাহা। ইদমদ্ভ্যো ঽপ্সরোভ্য উর্জ্জোভ্যঃ ॥ ৮ ॥ ওঁ ভুজ্যুঃ সুপর্ণো যজ্ঞো গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট্। ইদং ভুজ্যবে সুপর্ণায় যজ্ঞায় গন্ধর্ব্বায় ॥ ৯ ॥ ওঁ ভুজ্যুঃ সুপর্ণো যজ্ঞো গন্ধর্ব্বঃ। তস্য দক্ষিণা অপ্সরসস্তারা নাম তাভ্যঃ স্বাহা। ইদং দক্ষিণাভ্যোঽপ্সরোভ্যস্তারাভ্যঃ ॥ ১০ ॥ ওঁ প্রজাপতির্ব্বিশ্বকর্ম্মা মনো গন্ধর্ব্বঃ। স ন ইদং ব্রহ্মক্ষেত্রং পাতু তস্মৈ স্বাহা বাট্। ইদং প্রজাপতয়ে বিশ্বকর্ম্মণে মনসে গন্ধর্ব্বায় ॥ ১১ ॥ ওঁ প্রজাপতির্ব্বিশ্ব- কর্ম্মা মনো গন্ধর্ব্বঃ। তস্য ঋক্সামান্যপ্সরস এষ্টয়ো নাম তাভ্যঃ স্বাহা। ইদমৃক্ সামভ্যোঽপ্সরোভ্যঃ এষ্টিভ্যঃ ॥ ১২ ॥ ততো জয়াহোমঃ। ওঁ চিত্তঞ্চ স্বাহা। ইদং চিত্তায়। ওঁ চিত্তিশ্চ স্বাহা। ইদং চিত্ত্যৈ। ওঁ আকূতঞ্চ স্বাহা। ইদমাকূতায়। ওঁ আকূ-

তঞ্চ স্বাহা। ইদমাহূতায়। ওঁ আহূতিশ্চ স্বাহা। ইদমাহূত্যৈ। ওঁ বিজ্ঞানঞ্চ স্বাহা। ইদং বিজ্ঞানায়। ওঁ মনশ্চ স্বাহা। ইদং মনসে। ওঁ শক্করী চ স্বাহা। ইদং শক্কর্য্যৈ। ওঁ দর্শশ্চ স্বাহা। ইদং দর্শায়। ওঁ পৌর্ণমাসশ্চ স্বাহা। ইদং পৌর্ণমাসায। ওঁ বৃহচ্চ স্বাহা। ইদং বৃহতে। ওঁ রথন্তরঞ্চ স্বাহা। ইদং রথন্তরায়। ওঁ প্রজাপতির্জ্জয়ানিন্দ্রায় বৃষ্ণে প্রায়চ্ছদুগ্রঃ পৃতনা জয়েষু। তস্মৈ বিশঃ সমনয়ন্ত সর্ব্বাঃ স উগ্রঃ স হি হব্যো বভূব স্বাহা। ইদং প্রজাপতয়ে জয়ানামধিপতয়ে॥ অথাষ্টাদশাহুতিঃ। ওঁ অগ্নির্ভূতানামধিপতিঃ স মাবত্বস্মিন্ ব্রহ্মণ্যস্মিন্ ক্ষেত্রে স্যামাশিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্মণ্যস্যাং দেবহূত্যাগুঁ স্বাহা। ইদমগ্নয়ে ভূতানামধিপতয়ে। ওঁ ইন্দ্রো জ্যেষ্ঠানামধিপতিঃ স মাবত্বস্মিন্ ক্ষেত্রে স্যামাসিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্মণ্যস্যাং দেবহূত্যাগুঁ স্বাহা। ইদমিন্দ্রায় জ্যেষ্ঠানামধিপতয়ে। ওঁ যমঃ পৃথিব্যানামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। 
ইদং যমায় পৃথিব্যানামধিপতয়ে। ওঁ বায়ুরন্তরীক্ষস্যাধিপতিরিত্যাদি। ইদং বায়বে অন্তরীক্ষস্যাধিপতয়ে। ওঁ সূর্য্যো দিবোঽধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং সূর্য্যায় দিবোঽধিপতয়ে। ইদং চন্দ্রমসে নক্ষত্রাণামধিপতয়ে। ওঁ বৃহস্পতির্ব্রহ্মণোঽধিপতিরিত্যাদি। ওঁ চন্দ্রমা নক্ষত্রাণামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং বৃহস্পতয়ে ব্রহ্মণোঽধিপতয়ে। ওঁ মিত্রঃ সত্যানামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং মিত্রায় সত্যানামধিপতয়ে। ওঁ বরুণোঽপামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং বরুণায় অপামধিপতয়ে। ওঁ সমুদ্রঃ স্রোতসামধিপতিঃ স মাবত্বাস্মিন্নিত্যাদি। ইদং সমুদ্রায় স্রোতসামধিপতয়ে। ওঁ অন্নগুঁ সাম্রাজ্যানামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদমন্নায় সাম্রাজ্যানামধিপতয়ে। ওঁ সোম ওষধীনাম-

ধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং সোমায় ওষধীনামধিপতয়ে। ওঁ সবিতা প্রসবানামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং সবিত্রে প্রসবানামধিপতয়ে। ওঁ রুদ্রঃ পশূনামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং রুদ্রায় পশূনামধিপতয়ে। ওঁ ত্বষ্টা রূপাণামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং ত্বষ্ট্রে রূপাণামধিপতয়ে। ওঁ বিষ্ণুঃ পর্ব্বতামধিপতিঃ স মাবত্বস্মিন্নিত্যাদি। ইদং বিষ্ণবে পর্ব্বতানামধিপতয়ে। ওঁ মরুতো গণানামধিপতয়ঃ তে মাবন্তস্মিন্নিত্যাদি। ইদং মরুদ্ভ্যো গণানামধিপতিভ্যঃ। ওঁ পিতরঃ পিতামহাঃ পারঽবরে ততাস্ততামহাস্তে ইহ মামবন্তস্মিন্ ব্রহ্মণ্যস্মিন্ ক্ষেত্রে স্যামাশিষ্যস্যাং পুরোধায়ামস্মিন্ কর্ম্মণ্যস্মিন্ দেবহূত্যাগুঁ স্বাহা। ইদং পিতৃভ্যঃ পিতামহেভ্যঃ পরভ্যো ঽবরেভ্যস্ততেভ্যস্ততামহেভ্যঃ। তত উদকোপস্পর্শনং কৃত্বা ওঁ অগ্নিরৈতু প্রথমো দেবতানাং সো ঽস্যৈ প্রজাং মুঞ্চতু মৃত্যুপাশাত্তদয়ং রাজা বরুণোঽনুমন্যতাং যথেয়ং স্ত্রী পৌত্রমঘন্নরোদাৎ স্বাহা। ইদমগ্নয়ে। ওঁ ইমামগ্নিস্ত্রায়তাং গার্হপত্যঃ প্রজামস্যৈ নয়তু দীর্ঘমায়ুঃ। অশূন্যোপস্থা জীবতামস্তু মাতা পৌত্রমানন্দমভিবুধ্যতামিয়গুঁ স্বাহা। ওঁ স্বস্তিনোঽগ্নে দিবা পৃথিব্যা বিশ্বা নিধেহি যথা অজত্র যদস্যাং মহিদিবি জাতং প্রশস্তং তদস্মাসু দ্রবিণং ধেহি চিত্রং স্বাহা। ইদং বৈবস্বতায়। ওঁ পরং মৃত্যোঽনুপরেহি পন্থা যস্তে ঽন্য ইতরো দেবযানাচ্চক্ষুষ্মতে শৃণ্বতে তে ব্রবীমি মানঃ প্রজাগুঁরীরিষো মোত বীরান্ স্বাহা। ইদং মৃত্যবে। তত্র কুমার্য্যা ভ্রাতা শমীপত্রমিশ্রিতান্ লাজান্ শূর্পএব চতুর্ধা বিভজ্য বরগৃহীতকন্যাঞ্জলৌ ঘৃতশ্রুবেণোপস্তরণং দত্ত্বা শূর্পস্থমেকং লাজভাগং কুমার্য্যা অঞ্জলৌ দত্ত্বা পুনস্তথৈব ঘৃতশ্রুবেণাভিঘারয়েৎ। ততঃ কন্যা পত্যা সহ উত্থায় তথৈব তানঞ্জলিস্থান্ লাজান্ বারত্রয়মেব বরেণ পঠিতে মন্ত্রে

জুহোতি ॥ ওঁ অর্য্যমাণং নু দেবং কন্যাগ্নিময়ক্ষত স নো ঽর্য্যমা দেবঃ প্রেতো মুঞ্চতু মা পতেঃ স্বাহা। ইদমর্য্যম্নে। ইতি হুত্বা কন্যায়াঃ সাঙ্গুষ্ঠং হস্তং দক্ষিণহস্তেন গৃহ্ণাতি বরঃ। ওঁ গৃভ্ণামি তে সৌভগত্বায় হস্তং ময়া পত্যা জরদষ্টির্যথাসৎ। ভগোঽর্য্যমা দেবঃ সবিতা পুরন্ধির্ম্মহ্যং ত্বাদুর্গার্হপত্যায় দেবাঃ অমোহমস্মি সা ত্বং সা ত্বমস্যমোহং সামাহমস্মি ঋক্ ত্বং দ্যৌরহং পৃথিবী ত্বং। তাবেহি বিবহাবহৈ সহ রেতো দদাবহৈ পুত্রান্ বিন্দাবহৈ বহূংস্তে সন্তু জরদষ্টয়ঃ। সংপ্রিয়ৌ রচিষ্ণুসুমনস্যমানৌ। পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতং। ততো বরোঽগ্নেরুত্তরে শিলায়াং দক্ষিণপাদেনারোহয়তি। ওঁ আরোহেম অশ্মানমশ্মেব স্থিরা ভব। অভিতিষ্ঠ পৃতন্যতো ঽববাধস্ব পৃতনায়ত। কন্যাং শিলায়ামুত্থাপ্য গাথাং গায়তি বরঃ। ওঁ সরস্বতি প্রেদমবসুভগে বাজিনীবতীয়াত্বা বিশ্বস্য ভূতস্য প্রগয়াম্যস্যাগ্রতঃ। যস্যাং ভূতগুঁ সমভবদ্যস্যাং বিশ্বমিদং জগৎ। তামদ্য গাথাং গাস্যামি যা স্ত্রীণামুত্তমং যশঃ। ততঃ সবধূকো বরোঽগ্নিপ্রদক্ষিণীকুর্ব্বন্ পঠেৎ। ওঁ তুভ্যমগ্নে পর্য্যবহৎ সূর্য্যো বহতু মা সহ। পুনঃ পতিভ্যো জায়াদাগ্নে প্রজয়া সহ। পুনঃ কুমার্য্যা ভ্রাতা লাজান্ অঞ্জলৌ দত্ত্বা পুনস্তথৈব ঘৃতশ্রুবেণাভিঘারয়েৎ। ওঁ ইয়ং নার্য্যুপব্রূতে লাজানাবপন্তিকা। আয়ুষ্মানস্তু মে পতিরধন্তাং জ্ঞাতয়ো মম স্বাহা। ইদমগ্নয়ে ॥ ২ ॥ পূর্ব্বলিখিতমন্ত্রেণ পাণিগ্রহণশিলারোহণাগ্নিপ্রদক্ষিণং কৃত্বা পুনর্জুহুয়াৎ। ওঁ ইমান্ লাজান্ বিপাম্যগ্নৌ সমৃদ্ধিকরণাগুঁ স্তব। মম তুভ্য চ সংবদনং তদগ্নিরনুমন্যতামিয়গুঁ স্বাহা ॥ ৩ ॥ পূর্ব্বমন্ত্রেণ পাণিগ্রহণশিলারোহণাগ্নিপ্রদক্ষিণং কৃত্বা চতুর্থ লাজভাগং শূর্পকোণেনৈব জুহোতি। ওঁ ভগায় স্বাহা। ইদং ভগায়। হুত্বা হুত্বা ব্রহ্মণোঽন্বারব্ধ পূর্ব্বকং আজ্যেনৈব প্রাজা-

পত্যহোমঃ। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। অথোত্তরং সপ্তমণ্ড-
লিকাং কৃত্বা তা একৈকশঃ কন্যায়া দক্ষিণচরণমগ্রে দাপয়ত্যেভির্ম্মন্ত্রৈঃ। একমিষে বিষ্ণুস্ত্বাং নয়তু। ওঁ দ্বে উর্জ্জে বিষ্ণুস্ত্বাং
নয়তু। ওঁ ত্রীণি রায়স্পোষায় বিষ্ণুস্ত্বাং নয়তু। ওঁ চত্বারি মায়োভবায় বিষ্ণুস্ত্বাং নয়তু। পঞ্চপশুভ্যো বিষ্ণুস্ত্বাং নয়তু।
ওঁ ষড়্ ঋতুভ্যো বিষ্ণুস্ত্বাং নয়তু। ওঁ সখে সপ্তপদী ভব সামমামনুব্রতা ভব বিষ্ণুস্ত্বাং নয়তু। ততো মিত্রহস্তস্থিত কলসজলেন
বধূমভিষিঞ্চতি বরঃ। ওঁ আপঃ শিবাঃ শিবতমাঃ শান্তাঃ শান্ততমাঃ তাস্তে কৃণ্বন্তু ভেষজং। ওঁ আপোহিষ্ঠা ইত্যাদিভির্ম্মন্ত্রৈঃ।
অথৈনাং সূর্য্যমুদীক্ষয়তি প্রেষ্যমুক্তা। ওঁ তচ্চক্ষুর্দ্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ। পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম
শরদঃ শতং। অনেন মন্ত্রেণ অথাস্যা দক্ষিণস্কন্ধাসক্তহস্তেন হৃদয়ং স্পৃষ্টা জপতি। ওঁ মম ব্রতে তে হৃদয়ং দধামি মম চিত্ত- ১৪১
মনুচিত্তন্তে হস্ত মম বাচমেকমনা জুষস্ব প্রজাপতিস্ত্বা নিযুনক্তু মহ্যং। অথৈনামভিমন্ত্রয়েৎ। ওঁ সুমঙ্গলীরিয়ং বধূরিমাং সমেত
পশ্যত সৌভাগ্যমস্যৈ দত্বা যথাস্তাং বিপরেত ন ইতি। ততো বরো হগ্নেরুত্তরে বস্ত্রাদিনা সুগুপ্ত স্থানে লোহিত চর্ম্মণি কশ্চিৎ-
সমর্থঃ পুরুষঃ কন্যামুপবেশয়তি। বরশ্চ তত্রোপবিশ্য পঠতি। ওঁ ইহ গাবো নিষীদন্ত্বিহাশ্বা ইহ পূরুষা ইহ সহস্রদক্ষিণো যজ্ঞ
ইহ পূষা নিষীদতু। ততঃ স্বিষ্টিকৃদ্ধোমঃ। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। ততঃ আচম্য। ধ্রুবমীক্ষত
ইতি প্রৈষ্যমুক্ত্বা বধূং ধ্রুবং দর্শয়তি বরঃ। ওঁ ধ্রুবমসি ধ্রুবং বঃ পশ্যামি ধ্রুবে হধিপোষ্যামযি মহ্যং ত্বাদাদ্বৃহস্পতির্ময়া পত্যা
প্রজাবতী সংজীব শরদঃ শতং। ইত্যনেন মন্ত্রেণ। সা যদি ন পশ্যেদপি পশ্যামীতি ব্রুয়াৎ। অথ যদি দিবাবিবাহস্তদা

শেষাদিকং কৃত্বা এব রাত্রৌ ধ্রুবদর্শনং কারয়িতব্যং। ততো বিবাহদিনাৎ প্রভৃতি ত্রিরাত্রমক্ষারলবণাশিনৌ স্যাতাং। অধঃ শয়ীয়াতাং। অথ চতুর্থীহোমঃ। তত্র শিখিনামানমগ্নিং সংস্থাপ্য প্রকৃত কর্ম্মারম্ভে মহাব্যাহৃতি হোমং কুর্য্যাৎ। তত্র আজ্যেন পঞ্চাহুতীর্জুহুয়াৎ। ওঁ অগ্নে প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি যাস্যৈ পতিঘ্নী তনুস্তা-মস্যৈ নাশায় স্বাহা। ইদমগ্নয়ে ॥ ১ ॥ হুতশেষং জলপাত্রে স্থাপয়েৎ কন্যাভিষেকার্থং। ওঁ বায়ো প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি যাস্যৈ প্রজাঘ্নী তনুস্তামস্যৈ নাশয় স্বাহা। ইদং বায়বে ॥ ২ ॥ ওঁ সূর্য্য প্রায়-শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাযামি যাস্যৈ পশুঘ্নী তনুস্তামস্যৈ নাশয় স্বাহা। ইদং সূর্য্যায় ॥ ৩ ॥ ওঁ চন্দ্র প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি যাস্যৈ গৃহঘ্নী তনুস্তামস্যৈ নাশয় স্বাহা। ইদং চন্দ্রায় ॥ ৪ ॥ ওঁ গন্ধর্ব্ব প্রায়শ্চিত্তে ত্বং দেবানাং প্রায়শ্চিত্তিরসি ব্রাহ্মণস্ত্বা নাথকাম উপধাবামি যাস্যৈ যশোঘ্নী তনুস্তা-মস্যৈ নাশয় স্বাহা। ইদং গন্ধর্ব্বায় ॥ ৫ ॥ ততো যথাবিধি চরুং কৃত্বা স্থালীপাকস্য জুহোতি। অবদানপ্রত্যবদানধর্ম্মেণ। ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে। ততঃ আহুতিশেষেণ পূর্ব্বস্থাপিতেন কন্যাভিষেচনং কুর্য্যাৎ। ওঁ যা তে পতিঘ্নী গৃহঘ্নী যশোঘ্নী নিন্দিতা তনূর্জারঘ্নী তামেনাং করোমি সা জীর্য্যহং ময়া সহাসৌ। অত্র মন্ত্রে অসৌ ইতি স্থানে সম্বোধ-নান্তং বধূনামাতিদেশং ব্রূয়াৎ। ততঃ কন্যায়াঃ স্থালীপাকপ্রাশনে বরঃ পঠতি। ওঁ প্রাণৈস্তে প্রাণান্ সন্দধাম্যস্থিভিরস্থীনি মাংসৈর্মাংসানি ত্বচা ত্বচং। ততো ব্রাহ্মণোহম্বারব্ধঃ স্থালীপাকাদেব গৃহীত্বা ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে।

ইতি হুত্বা আজ্যেন মহাব্যাহৃতি হোমং কুর্য্যাৎ। ওঁ ভূঃ স্বাহা। ইদং ভূঃ। ওঁ ভুব স্বাহা। ইদং ভুবঃ। ওঁ স্বঃ স্বাহা। ইদং স্বঃ
ওঁ ভূর্ভুর্বঃ স্বঃ স্বাহা। ইদং ভূর্ভুর্বঃ স্বঃ। ততঃ সর্ব্বপ্রায়শ্চিত্তহোমঃ। সঙ্কল্পং কৃত্বা বিধুনামানমগ্নিং সংস্থাপ্য জুহুয়াৎ।
ওঁ ত্বন্নোঽগ্নে বরুণস্য বিদ্বান্ দেবস্য হেলো অবযাসি সীষ্টা। যজিষ্ঠো বহ্নিতমঃ শোশুচানো বিশ্বান্দেশাগুঁ প্রমুগ্ধঃ সৎ স্বাহা।
ইদমগ্নীবরুণাভ্যাং॥ ১ ॥ ওঁ সত্বন্নোঽগ্নে বমোভবতীনেদিষ্টো অস্যা উষসো ব্যুষ্টৌ অবযক্ষণো বরুণগুঁ বরাণো ব্রীহি মৃড়ী-
কহুঁ সুহবো ন এধি স্বাহা। ইদমগ্নীবরুণাভ্যাং॥ ২ ॥ ওঁ অয়াশ্চাগ্নেঽস্যনভিস্বস্তিপাশ্চ সত্যমিথ ময়া অসি। অয়ানো যজ্ঞং
বহাস্যয়ানো ধেহি ভেষজগুঁ শতক্রতো স্বাহা। ইদমগ্নয়ে। ওঁ যে তে শতং বরুণ যে সহস্রং যজ্ঞিয়াঃ পাশা বিততা মহান্ত
স্তেভির্নোঽদ্য সবিতেতি বিষ্ণুর্বিশ্বে মুঞ্চন্তু মরুতঃ স্বকাঃ স্বাহা। ইদং বরুণায়। ওঁ বিষ্ণবে বিশ্বেভ্যো মরুদ্ভ্যঃ স্বর্কেভ্যঃ। ওঁ ১৪৩
উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায়। অথবয়মাদিত্যব্রতে তবানাগসো ঽদিতয়ে স্যামঃ স্বাহা। ইদমগ্নয়ে। ইতি হুত্বা
প্রায়শ্চিত্তহোমং কৃত্বাচম্য ব্রহ্মণে দক্ষিণাং দদ্যাৎ। অদ্যেত্যাদি মদীয় বিবাহকর্ম্মাঙ্গভূত হোমকর্ম্মণি ব্রহ্মকর্ম্ম প্রতিষ্ঠার্থং দক্ষিণা-
মিদং পূর্ণপাত্রং তুভ্যমহং সম্প্রদদে। স্বস্তীতি ব্রহ্মা। ততঃ শান্তিং কৃত্বা শান্ত্যুদকেনাত্মানং বধূঞ্চাভিবিচ্যাশীর্ব্বদং কৃত্বাচ্ছি-
দ্রাবধারণং কুর্য্যাৎ ইতি। অধঃ শয়ীয়াতাং। সম্বৎসরং ন মৈথুনমুপেয়াতাং অশক্তৌ দ্বাদশরাত্রং ত্রিরাত্রং বা। ওঁ তং পত্নী-
ভিরনুগচ্ছেম দেবাঃ পুত্রৈর্ভ্রাতৃভিরুত বা হিরণ্যৈনাকং গৃভ্নানাঃ সুকৃতস্য লোকে তৃতীয়ে পৃষ্ঠে ঽধিরোচনে দিবঃ॥ * ॥ * ॥

॥ * ॥ ইতি যজুর্ব্বেদিবিবাহ পদ্ধতিঃ সমাপ্তা॥ * ॥

অথ গর্ভাধানং। তত্র প্রথমং নিবন্ধোক্তকালে দিন এব পূর্ব্বাহ্নে কৃতনিত্যকৃত্যো বিবাহপদ্ধত্যুক্তক্রমেণ গৌর্য্যাদিষোড়শ-মাতৃকাপূজাং কুর্য্যাৎ। পূর্ব্বোত্তরে শাম্যতমমুখ উপবিশ্য স্বদক্ষিণে পত্নীমুপবেশ্য তস্যা দক্ষিণস্কন্ধাসক্তহস্তেন হৃদয়ং স্পৃষ্ট্বা জপতি। ওঁ পূষা ভগং সবিতা মে দদাতু রুদ্রস্ত্বষ্টা মে কল্পয়তাং ললনামুগ্রং। ত্বষ্টা রূপাণি তেজো বৈশ্বানরো দদাতু। ওঁ গর্ভন্ধেহি সিনীবালি গর্ভন্ধেহি সরস্বতি। গর্ভন্তে অশ্বিনৌ দেবা বাবাধত্তাং পুষ্করস্রজৌ। অনেন মন্ত্রেণ প্রাশয়েৎ। ওঁ রেতো-মূত্রং বিজহাতি যোনিং প্রবিশদিন্দ্রিয়ং। গর্ভো জরায়ুণাবৃত উল্যং জহাতি জনানাং। ওঁ যত্তে সুষীমে হৃদয়ং দিবি চন্দ্রমসি শ্রিতং। বেদাহং তন্মাং তদ্বিদ্যাৎ পশ্যেম শরদঃ শতং জীবেন শরদঃ শতং শৃণুয়াম শরদঃ শতং। ততো নিষেকং কুর্য্যাৎ। এবং কৃতেঽপি যদি গর্ভং ন ধারিতবতী তদান্যস্মিন্নৃতৌ নস্যাদানায় পতিঃ পূর্ব্বদিনে উপোষ্য পুষ্যানক্ষত্রযুক্তে দিনে শ্বেতপুষ্প-কণ্টিকারীমূলমুদ্ধৃত্য গুপ্তদেশে স্থাপয়েৎ। তদনু ঋতুস্নানদানদিনে দম্পতী নিরাহারৌ তিষ্ঠেতাং। ততঃ পতিঃ সায়ং সন্ধ্যাং নির্ব্বর্ত্ত্য শুভে লগ্নে আহতবাসঃ পরিধানামাচান্তাং কৃতমঙ্গলাং বধূং প্রাঙ্মুখীমাত্মবামে সমুপবেশ্য পূর্ব্বোদ্ধৃতকণ্টিকারীমূলমাচারাৎ পর্য্যুষিত জলেন পিষ্ট্বা মঙ্গলপূর্ব্বকং তস্যা দক্ষিণনাসাপুটে সিঞ্চেৎ। অনেন মন্ত্রেণ। ওঁ ইয়মোষধি ত্রায়মাণা সহমানা সরস্বতী। তস্যাং বৃহত্যাং পুত্রঃ পিতুরিব নামজগ্রভবৎ। ততো যথাসুখং ভুঞ্জীয়াতাং। ততঃ পূর্ব্বোক্তবিধিনা নিষেকং কুর্য্যাৎ॥ * ॥

॥ * ॥ ইতি গর্ভাধানং॥ * ॥

অথ পুংসবন। পুরাস্কন্দত ইতি মাসে দ্বিতীয়ে তৃতীয়ে বা শুভদিনে আপুর্য্যমাণ পক্ষে পুংনক্ষত্রে নির্ব্বর্ত্তিত নিত্যকৃত্যঃ পত্নীঞ্চ স্নাপয়িত্বা মাতৃকাপূজাং বসোর্ধারাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা পত্নীসহিতো দিবা নিরাহারাববতিষ্ঠেতাং। ততঃ পতিঃ সায়ং-সন্ধ্যাং নির্ব্বর্ত্ত্য শুভে লগ্নে নূতন বসোযুগ পরিধানামাচান্তাং কৃতমঙ্গলাচারং প্রাঙ্মুখীমাত্মবামে সমুপবেশ্য বটারোহং বট-শুঙ্গঞ্চ সম্ভবে সোমলতাং পুর্ব্বকুশ কণ্টঞ্চ সম্ভবে পর্য্যুষিত জলেন পিষ্ট্বা মঙ্গলপূর্ব্বকং তস্যা দক্ষিণনাসাপুটে সমাসিঞ্চেৎ। ওঁ হিরণ্যগর্ভঃ সমবর্ত্ততাগ্রে ভূতস্য জাতঃ পতিরেক আসীৎ। সদা ধার পৃথিবীং দ্যামুতেমাং কস্মৈ দেবায় হবিসা বিধেমঃ। ওঁ অদ্ভ্যঃ সম্ভৃতং পৃথিব্যৈ রসাচ্চ বিশ্বকর্ম্মণঃ সমবর্ত্ততাগ্রে তস্য ত্বষ্টা বিদধদ্রূপমেতি। তন্মর্ত্ত্যস্য দেবত্বমাজানমগ্রে। ইতি মন্ত্রেণ। অথ যদি গর্ভস্য বীর্য্যবত্ত্বং কাময়তে তদা ভার্য্যায়াঃ ক্রোড়সন্নিধৌ পাত্রস্থং পানীয়ং স্থাপয়িত্বা তৎ পানীয়ং মন্ত্রে-ণানেন মন্ত্রয়েৎ। ওঁ সুপর্ণো হসিগরুত্বাংস্ত্রি বৃত্তেশিরঃ। গায়ত্রঞ্চক্ষুর্ব্বৃহদ্রথন্তরে পক্ষৌ। ওঁ স্তোমআত্মচ্ছন্দাংস্যঙ্গানি যজূংষি-নাম। সামেত তনুর্ব্বামদেব্যং যজ্ঞা যজ্ঞিয়ং পুচ্ছং ধিষ্ণ্যাঃ শর্কাঃ। ওঁ সুপর্ণো হসি গরুত্মাদেবঙ্গচ্ছ স্বগত। ততঃ শান্তিং কৃত্বাশীর্ব্বাদঞ্চ কুর্য্যাৎ॥ ইতি পুংসবনং কর্ম্ম সমাপ্তং॥ * ॥ * ॥ * ॥ * ॥ 

অথ সীমন্তোন্নয়নং। পুংসবনমাসে ষষ্ঠে হষ্টমেবা ততঃ শুভদিনে প্রাতর্নির্ব্বর্ত্তিত নিত্যকৃত্যঃ পত্নীঞ্চ স্নাপয়িত্বা প্রথমং মাতৃকাপূজা বসোর্ধারা বৃদ্ধিশ্রাদ্ধঞ্চ নির্ব্বির্ত্ত্য শুভে লগ্নে বহিঃ শালায়াং পুনরাচম্য প্রাঙ্মুখ উপবিশ্য আচারাৎ গোরোচনলিখিত পদ্মশঙ্খচক্রগদাদ্বাদশ কেশবনামযুত পীতবাসোযুগপরিধানাং কৃতমঙ্গলামাচান্তাং পত্নীমাত্মবামে শঙ্খচক্রগদাপদ্মবিষ্ণুপদযুগাঙ্কিত যাজ্ঞিক বৃক্ষঘটিত ভদ্রপীঠোপরি সমুপবেশয়েৎ। ততঃ পতিরগ্নিস্থাপনার্থং হস্তপ্রমাণং স্থণ্ডিলং পূর্ব্বোক্তেন কুশণ্ডিকাং প্রোক্ষণী পাত্রস্থাপনান্তাং কৃত্বা পূর্ব্বাসাদিত তিলদুগ্ধমিশ্রিত তণ্ডুলস্য মুষ্টিমেকাং ওঁ প্রজাপতয়ে ত্বা জুষ্টং গৃহ্নামীতি গৃহীত্বা ওঁ প্রজাপতয়ে ত্বা যুষ্টং নির্ব্বপামীতি উদূখলে নিক্ষিপ্য ওঁ প্রজাপতয়ে ত্বা ডুষ্টং প্রোক্ষয়ামীতি প্রোক্ষণী জলেন প্রোক্ষয়েৎ। এবং অগ্নয়ে স্বিষ্টিকৃতে ত্বা গ্রহণনির্ব্বপণপ্রোক্ষণানি কুর্য্যাৎ। ততো মূষলেনাবহত্য শূর্পেণ ত্রিঃ প্রস্ফোটনং কৃত্বা ত্রিঃ প্রক্ষাল্য তণ্ডুলান্ চরুস্থাল্যাং নিক্ষিপ্য দুগ্ধং দত্ত্বা প্রণীতোদকেনাবসিচ্যাগ্নিমধ্যে চরুমধিশ্রপয়েৎ। ততঃ সিদ্ধং চরুং জ্ঞাত্বা ঘৃতশ্রুবেণাভিঘার্য্য জলাদিস্কনেন স্থালীমধ্যং দৃষ্ট্বা হগ্নেরুরুত্তরতো হবতার্য্য পুনর্ঘ্বৃতশ্রুবেণাভিঘারয়েৎ। তত আজ্যভাগান্তাং কুশণ্ডিকাং সমাপ্য প্রকৃতং কর্ম্ম কুর্য্যাৎ। যথা ওঁ অগ্নে ত্বং মঙ্গলনামাসীতি অগ্নের্নাম কৃত্বা ধ্যাত্বা সংপূজ্য হোমং কুর্য্যাৎ। স্থালীপাকস্য জুহোতি অবদান ধর্ম্মেণ। যথা শ্রুচি ঘৃতশ্রুবং দত্ত্বা চরৌ ঘৃতশ্রুবং দদ্যাৎ। ততো মেক্ষণেন চরুমবদায় পুনশ্চরাববদানং স্থানে ঘৃতশ্রুবং দত্ত্বা ওঁ প্রজাপতয়ে স্বাহা ইতি হুত্বা ইদং প্রজাপতয়ে ইতি দেবতোদ্দেশঃ কার্য্যঃ। পুনস্তথৈবাবদায় অগ্নয়ে স্বিষ্টিকৃতে স্বাহা ইদমগ্নয়ে স্বিষ্টিকৃতে। ততো অগ্নেঃ পশ্চান্মৃদুপীঠে উপবিষ্টায়া বধ্বাঃ পূর্ব্ব- ১৪৬

স্থাপিত উড়ুম্বর ফলস্তবকযুগ্মেন ত্রিভি স্ত্রিদির্ভ পিঞ্জলৈঃ সহ একীকৃত্য সীমন্তং ললাটোর্দ্ধকেশবিন্যাসং যথা ভবতি তথা বিনয়তি ততো বিবিক্তং কারয়তি ওঁ ভূর্বিনয়ামি ওঁ ভুবো বিনয়ামি। এবং ত্রিঃ শ্বেতয়া শলল্যা উড়ুম্বরফল সহিতয়া তথা কাণ্ডেন উড়ুম্বরফলসহিতয়া তথা সূত্রপূরিত তর্কুণা উড়ুম্বরসহিতেন প্রত্যেকং সীমন্তকরণং সর্ব্বেষাং করণভূতত্বাৎ। তত স্ত্রিগুণীকৃত্য সূত্রেণ উড়ুম্বরস্তবকং বদ্ধা কণ্ঠে বধ্নাতি। ওঁ অয়মূর্জবতোবৃক্ষ উর্জীব ফলনী ভব ইতি মন্ত্রেণ। ততঃ প্রায়শ্চিত্ত হোমাদিকং কৃত্বা ব্রাহ্মণায় দক্ষিণাং দদ্যাৎ। ততঃ ওঁ কশ্যপস্য ত্র্যায়ুষং ইত্যাদি কর্ম্ম কুর্য্যাৎ। ততো বীণাগাথিনৌ প্রেষয়তি রাজানাং গায়েতামিতি হো বাপ্যন্যোবীত ইতি। তত স্তৌ গায়েতাং। এতামপি নিযুক্তাং গাথাং গায়েতামিতি কেচিৎ। ওঁ সোম এব বাজেব মানুষীপ্রজাং অবিযুক্তচক্রা আসীরংস্তীরে তুভ্যমসৌ। অসাবিতস্য স্থানে এষাং 
নদীমুপবসিতারো ভবতি তস্য নামাতিদেশঃ। হে গঙ্গে হে যমুনে ইত্যাদি। ততঃ দক্ষিণাং দত্বা ব্রাহ্মণায় ভোজনং দদ্যাৎ। ততঃ ঋচং বাচ মিত্যাদিনা শান্তিং কৃত্বা আশীর্ব্বাদমচ্ছিদ্রাবধারণঞ্চ কুর্য্যাৎ। পত্নী চ আচারাচ্চরুশেষং প্রাশ্য মঙ্গলং পূর্ব্বকং ভুঞ্জীতং ॥ * ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি সীমন্তোন্নয়নং সমাপ্তং ॥ * ॥

অথ শোষ্যন্তী কর্ম্ম ॥ * ॥ প্রসবকালে। ওঁ এজতু দশমাস্যো গর্ভো জরায়ুণা সহ। যথায়ং বায়ু রেজতি তথা সমুদ্র এজত্বেবায়ং দশমাস্যো ঽসৃঙ্জরায়ুণা সহ ইতি পত্নী মদ্ভিরভ্যুক্ষেৎ ॥ * ॥ ইতি শোষ্যন্তী কর্ম্ম সমাপ্তং ॥ * ॥

অথ জাতকর্ম্ম ॥ * ॥ তত্র প্রথমং সচেলং স্নাত্বা বিবাহপদ্ধত্যুক্ত ক্রমেণ গৌর্য্যাদি ষোড়শমাতৃকাপূজাং বসোর্ধারাং দত্ত্বা পুত্রস্য জন্মমুখদর্শন নিমিত্তকয়োর্ভেদেন বৃদ্ধিশ্রাদ্ধং নির্ব্বর্ত্ত্য পিতা পুত্রস্যাচ্ছিন্ন নাভৌ মেধাজননায়ুষ্যে কর্ম্মণী করোতি। তত্র মেধাজননং অনামিকয়া সুবর্ণান্তর্হিতয়া চতুর্থা মধুঘৃতৈর্ব্বা প্রাশয়তি ঘৃতং বা ওঁ ভূস্ত্বয়ি দধামি ওঁ ভুবস্ত্বয়ি দধামি ওঁ স্বস্ত্বয়ি দধামি ওঁ ভূর্ভুবঃ স্বস্ত্বয়ি দধামি। এভি র্মন্ত্রৈর্যথায়ুষ্যং করোতি পুত্রস্য নাভৌ দক্ষিণ কর্ণে জপতি। ওঁ অগ্নিরায়ুষ্মান্ সবনস্পতি রায়ুষ্মাংস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ সোম আয়ুষ্মান্ স ওষধিভিরায়ুষ্মাংস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ ব্রহ্ম আয়ুষ্ম ব্রাহ্মণৌ আয়ুষ্ম তস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ দেবা আয়ুষ্মন্ত স্তে হয়্যতৈ রায়ুষ্মন্তস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ ঋষয় আয়ুষ্মন্তস্তে ত্বা ব্রতে রায়ুষ্মন্তস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ পিতর আয়ুষ্মন্তস্তে সুধাভি রায়ুষ্মন্তস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ যজ্ঞ আয়ুষ্মান্ সদক্ষিণাভী রায়ুষ্মাংস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ওঁ সমুদ্র আয়ুষ্মান্ সস্রবন্তীভি রায়ুষ্মাংস্তেন ত্বা আয়ুষা আয়ুষ্মন্তং করোমি। ইতি ত্রিরাবৃত্তং জপ্ত্বা ওঁ কশ্যপস্য ত্র্যায়ুষং যমদগ্নে স্ত্র্যায়ুষং যদ্দেবানাং ত্র্যায়ুষং তন্মে হস্তু ত্র্যায়ুষং। এতদপি ত্রিরাবৃত্তং জপেৎ। ততো যদি পিতা দীর্ঘায়ুষ্ট্বং কাময়তে তদা দক্ষিণ হস্তেন সর্ব্বগাত্রমভি মৃষেৎ। ওঁ দিবস্পতীত্যাদি ত্বামগ্নে যজমান ইত্যন্তেনানুবাক্যেন ততঃ কুমারস্য প্রতিদিশং মধ্যে চ পঞ্চ ব্রাহ্মণানবস্থাপ্য ব্রূয়াৎ। ওঁ ইমমনুং প্রাণায়েতি পূর্ব্বো ব্রূয়াৎ। ব্যানেতি দক্ষিণো ব্রূয়াৎ। ওঁ অপানেতি পশ্চিমো ব্রূয়াৎ। ওঁ উদানেতি উত্তরো ব্রূয়াৎ। ওঁ সমানেতি অবেক্ষ্যমাণো মধ্যস্থে ব্রূয়াৎ। সমান পঞ্চ ব্রাহ্মণা যদি ন লভন্তে তদা

অথ চূড়াকরণং। তত্র নিবন্ধোক্তকালে শুভ দিবসে নির্ব্বর্ত্তিতনিত্যকৃত্যঃ পিতা শুভে লগ্নে গৌর্য্যাদিমাতৃকাপূজাং বসুধারাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা ব্রাহ্মণত্রয়ভোজ্যত্রয় মুৎসৃজেৎ। অদ্যেত্যাদি মৎপুত্রস্যামুকস্য চূড়াকরণ কর্ম্মনি কর্ত্তব্যে যথাসম্ভব গোত্রশাখানামভ্যো ব্রাহ্মণেভ্যো যথোপকল্পিতং তৃপ্ত্যোপায়িকমন্নমহমুৎসৃজে। এবং যথাশক্তি তাম্বুলাদি দক্ষিণাং দত্ত্বা ভোজয়িত্বা বহির্নির্গত্য প্রাঙ্গণে ছায়ামণ্ডপে শুচিরাচান্তঃ প্রাঙ্মুখ উপবিশ্যাগ্নিস্থাপনং কুর্য্যাৎ। তত্রায়ং বিশেষঃ দ্রব্যাসাদনে। তদ্যথা। উষ্ণ জলং শীতলং জলং নবনীতপিণ্ডং। ত্রি শ্বেত শল্লকীকণ্টকং প্রত্যেকং কুশপত্রত্রয়নির্ম্মিতং কুশগুচ্ছনবকং। তাম্রক্ষুরং নূতন শরাবস্থিতবলীবর্দ্দগোময়পিণ্ডং। ততঃ পবিত্রচ্ছেদনৈঃ পবিত্রীকরণং। প্রোক্ষণ্যাং স্থাপনং। প্রণীতাজলেন প্রোক্ষণ্যাং পূরণং। সব্যে পাণৌ প্রোক্ষণ্যা উত্থাপনং। উত্তানাভির্দ্দক্ষিণাঙ্গুলীভিস্তদ্গতামপামুত্তোলনং। তাভির্যথাসাদিত প্রোক্ষণং। অয়ঞ্চ প্রোক্ষণ্যাং বিধিঃ আজ্যস্থাল্যামাজ্যনির্ব্বাপঃ। জ্বলদগ্নিনা বেষ্টনং। পর্য্যগ্নীকরণং। শ্রুবপ্রতপনং। সম্মার্জ্জনকুশৈঃ শ্রুবস্য মূলমধ্যাগ্রদেশেষু মার্জ্জনং। প্রণীতোদকেনাভ্যুক্ষণং। পুনঃ প্রতপনং ভূমৌ নিধানং। ততঃ আজ্যস্থালীমাত্মসংমুখমানীয় প্রোক্ষণীপাত্রস্থং পবিত্রং গৃহীত্বা আজ্যস্য কিঞ্চিদুত্তোলনরূপমুৎপবনং কৃত্বা আজ্যমবেক্ষেৎ। প্রোক্ষণীজলঞ্চ বামহস্তেনোপযমনকুশাদানং। উত্থায়াগ্নৌ সমিৎপ্রক্ষেপঃ। প্রোক্ষণ্যুদকেন পবিত্রেণ হস্তেনাগ্নেরীশানাদিতঃ পর্য্যুক্ষণং। পবিত্রং প্রণীতায়াং নিধানং। প্রোক্ষণীপাত্রং সংশ্রবার্থমগ্নেরুত্তরে স্থাপয়েৎ। তদনু কুমারং স্নাপিতং নূতন বাসোযুগং পরিধাপ্য মাত্রাঙ্কে কৃত্বা পশ্চাদগ্নেরুত্তরে উপবিশেৎ। ততো হস্তে ত্বং সত্যনামাসীতি নাম কৃত্বা ব্রাহ্মণো হন্বারম্ভপূর্ব্বকং শ্রুবং গৃহীত্বা আজ্যেনাঘারাবাজ্যভাগৌ জুহুয়াৎ। তত্রা- ১৫৪

চোচ্ছলকসৃজ নমস্তে ২স্তু সীসবোলপেতা২পদ্ধরৎ সত্যং। যস্তে সর্ব্বমামতৌ সীসবঃ পিতা স্যাবস[illegible]লৌ ভ্রাতরৌ চোচ্ছলকসৃজ নমস্তে ২স্তু সীসবোলপেতা ২পদ্ধরৎ তৎ সত্য মিত্যাদি। দক্ষিণহস্তেনাভিমৃষয়তি ওঁ দলিত হৃষ্যতি যত্র বয়ং বদামো যত্রচাভিমৃষা মসীতি॥ * ॥ ইতি জাতকর্ম্ম সমাপ্তং॥ * ॥ * ॥ * ॥

স্বয়মেব তেষু তেষু স্থানেষু গত্বা ব্রূয়াৎ। ততঃ কুমারো যস্মিন্ দেশে জাত স্তাং ভুমিমভিমন্ত্রয়েৎ। ওঁ বেদ তে ভুবি হৃদয়ং
দিবি চন্দ্রমসি শ্রিতং। বেদাহং তস্মাং তদ্বিদ্যাৎ পশ্যেম শরদঃ শতং জীবেম শরদঃ শতং শৃণুয়াম শরদঃ শতং ইতি। অথ
কুমারং নাভাবভি মৃষতি। ওঁ অশ্মাভব পরশুর্ভব হিরণ্যমশ্রুতস্ত্ববঃ। আত্মা বৈ পুত্রনামাসি সঞ্জীব শরদঃ শতং ইতি। অথ
কুমারমাতরমভি মন্ত্রয়েৎ। ওঁ ইড়াসি মৈত্রাবরুণী বীরমজীজনথাঃ। সা ত্বং বীরবতী ভব যাস্মান্ বীরবতো হকরোৎ। অথ
মাতুর্দক্ষিণস্তনং প্রক্ষাল্য জাতায় কুমারায় প্রযচ্ছতি। ওঁ ইমং স্তন মূর্জস্বন্তং রূপায়াঃ প্রপীণমগ্নে শরীরস্থ মধ্যে। উৎ সংজুষস্ব
শতধারমর্ব্বন্ সমুদ্রিয়ং সদনমাবিশস্বেতি। ততো বামস্তনং। ওঁ যস্তেস্তনং শশয়ো যো ময়োভূর্যোরত্নধারঃ সুবিদ্যঃ সুদতা।
যেন বিশ্বা পুষ্যাস বর্চ্চানি সরস্বতি তমিহ ধাতরেকঃ উর্ব্বন্ত বিক্রমান্নমীতি। ততঃ সূতিকামুষ্য শিরঃ প্রদেশে উদককুম্ভমবস্থায় 
তমভি মন্ত্রয়েৎ। ওঁ আপো দেবেষু জাগ্রথ যথা দেবেষু জাগ্রথ এবমস্যাং সূতিকায়াং সপুত্রিকায়াং জাগ্রথেতি। ততঃ সূতিকা
উত্থানপর্য্যন্তং সূতিগৃহ দ্বারদেশে কুশণ্ডিকা ব্যতিরেকেণাগ্নিমুপস্থাপ্য তণ্ডুলকণমিশ্রান্ সর্ষপান্ জুহোতি। ওঁ ষর্কা উপবীরঃ
শৌণ্ডিকেষু উদূখলঃ। মলিম্লুচো দ্রোণা সশ্চ্যবনো নশ্যতাদিতং স্বাহা। ওঁ আলিখন্নিমিষন্ কিমুপদন্ত ইপশ্রুতিঃ। হর্য্যক্ষ কুম্ভী-
শত্রুঃ পাত্রপাণির্নৃমলেমুখঃ সর্ষপাকণশ্চ্যবনো নশ্যতাদিতঃ স্বাহা। অথ দশরাত্রাভ্যন্তরে অস্মিন্ কালে যদি কুমার বালগ্রহ
উপদ্রব স্তদা শুচিরাচান্তঃ পিতা উদঙ্মুখঃ প্রাঙ্মুখো বা উপরিশ্য কুমারং ক্রোড়ে কৃত্বা জলেনোত্তরীয়েণ বাচ্ছাদ্য জপতি। কুর্কুরঃ
সকুর্করঃ কুর্করো বালবন্ধনাচ্চোচ্ছলকসৃজ নমস্তে হস্ত সীসবোলপেতাহপহ্বরৎসত্যং। যত্তে দেবা বমদঃখত্বং কুমারমেবা বৃণীথাঃ

ঘারৌ ওঁ প্রজাপতনয়ে স্বাহা। ইদং প্রজাপতয়ে। ইদং মনসৈব জুহুয়াৎ। অগ্নের্ব্বায়ুকোণাদারভ্য আগ্নেয়ং যাবদনবচ্ছিন্ন-
ঘৃতধারাদানং। ওঁ ইন্দ্রায় স্বাহা ইদমিন্দ্রায়। অগ্নের্নৈর্ঋত কোণাদারভ্য ঐশানীং যাবদনবছিন্ন ঘৃতধারাদানং। তত্রাজ্যভাগৌ
ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ইত্যগ্নেরুত্তরভাগে জুহুয়াৎ। ওঁ সোমায় স্বাহা। ইদং সোমায় অগ্নের্দক্ষিণভাগে জুহুয়াৎ। ততঃ
মহাব্যাহৃতি হোমঃ। ওঁ ভূঃ স্বাহা। ইদং ভূঃ। ওঁ ভুবঃ স্বাহা। ইদং ভুবঃ। ওঁ স্বঃ স্বাহা। ইদং সূর্য্যায়। ততঃ প্রায়-
শ্চিত্ত হোমঃ। সংঙ্কল্পং কৃত্বা অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বা জুহুয়াৎ। ওঁ ত্বন্নো হগ্নে ইত্যাদি। ইদমগ্নীবরুণাভ্যাং।
ওঁ স ত্বন্ন ইত্যাদি। পুনরিদমগ্নীবরুণাভ্যাং। ওঁ অয়াশ্চাগ্নে ইত্যাদি। ইদমগ্নয়ে। ওঁ যে তে শতং ইত্যাদি। ইদং বরুণায়
বিশ্বেভ্যো দেবেভ্যো মরুদ্ভ্যঃ স্বর্কেভ্যঃ। ওঁ উদুত্তমং ইত্যাদি ইদং বরুণায়। ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে। ততঃ
স্বিষ্টিকৃদ্ধোমঃ। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। ততঃ সংশ্রবং প্রাশ্যাচম্য ব্রাহ্মণে দক্ষিণাং দদ্যাৎ। ততঃ
শীতল জলেন উষ্ণজলং মিশ্রয়তি। ওঁ উষ্ণেন রায় উদকেনেহদিতে কেশান্ বপ ইতি মন্ত্রেণ কেশান্তে কেশশ্মশ্রু বপেতি মন্ত্র-
বিশেষঃ। ততস্তত্রৈব পূর্ব্বাসাদিত নবনীতপিণ্ডং তুষ্ণীং প্রক্ষিপ্য তেনৈব জলেন কুমারস্য দক্ষিণ শিরঃ পার্শ্বং দ্রময়তি। ওঁ স-
বিত্রা প্রসূতা দেব্য আপ উন্দন্তু তে তনূং দীর্ঘায়ুষ্টায় বলায় বর্চ্চসে ইতি মন্ত্রেণ। ততস্ত্রিশল্লকীকণ্টকেন কেশান্ বিজটীকৃত্য
তেন কুশপত্রত্রয়ং যোজয়তি। ওঁ ওষধে ত্রায়স্ব স্বধিতে মৈনং হিংসীঃ। ইতি মন্ত্রেণ। ততস্তাম্রক্ষুরং সকুশে কেশে সংলা-
পয়তি। ওঁ নিবর্ত্তয়াম্যায়ুষে হন্নাদ্যায় প্রজ্বলনায় রায়স্পোয়ায় সুপ্রজস্ত্বায় সুবীর্য্যায়। ইতি মন্ত্রেণ। ততস্তুষ্ণীং লৌহক্ষুর-

ভাগৌ হুত্বা বেদাহুতি হোমং কুর্য্যাৎ। ওঁ পৃথিব্যৈ স্বাহা ইদং পৃথিব্যৈ। ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ইতি ঋগ্বেদে। ওঁ অন্তরীক্ষায়
স্বাহা ইদমন্তরীক্ষায়। ওঁ বায়বে স্বাহা ইদং বায়বে। ইতি যজুর্ব্বেদে। ওঁ দিবে স্বাহা ইদং দিবে। ওঁ সূর্য্যায় স্বাহা।
ইদং সূর্য্যায়। ইতি সামবেদে। ওঁ দিগ্‌ভ্যঃ স্বাহা ইদং দিগ্‌ভ্যঃ। ওঁ চন্দ্রমসে স্বাহা ইদং চন্দ্রমসে। ইত্যথর্ব্ববেদে। অথ
সর্ব্ববেদসাধারণাহুয়ঃ। ওঁ ব্রহ্মণে স্বাহা ইদং ব্রহ্মণে। ওঁ ছন্দোভ্যঃ স্বাহা ইদং ছন্দোভ্যঃ। ওঁ প্রজাপতয়ে স্বাহা
ইদং প্রজাপতয়ে। ওঁ দেবেভ্যঃ স্বাহা ইদং দেবেভ্যঃ। ওঁ ঋষিভ্যঃ স্বাহা ইদং ঋষিভ্যঃ। ওঁ শ্রদ্ধায়ৈ স্বাহা ইদং শ্রদ্ধায়ৈ।
ওঁ মেধায়ৈ স্বাহা ইদং মেধায়ৈ। ওঁ সদসস্পতয়ে স্বাহা ইদং সদসস্পতয়ে। ওঁ অনুমতয়ে স্বাহা ইদং অনুমতয়ে।
ততো ব্রাহ্মণো ঽন্বারব্ধঃ। মহাব্যাহৃতি হোমং কুর্য্যাৎ। ওঁ ভূঃ স্বাহা ইদং ভূঃ। ওঁ ভুবঃ স্বাহা ইদং ভুবঃ। ওঁ ১৬৪
স্বঃ স্বাহা ইদং স্বঃ। ততঃ প্রায়শ্চিত্ত হোমঃ। সংকল্পং কৃত্বা অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বা ধ্যাত্বা
সংপূজ্য জুহুয়াৎ। ওঁ ত্বন্নো ঽগ্নে ইত্যাদি। ইদমগ্নীবরুণাভ্যাং। ওঁ স ত্বন্নোঽগ্নে ইত্যাদি। ইদংঽগ্নীবরুণাভ্যাং।
ওঁ অয়াশ্চাগ্নে ইত্যাদি। ইদমগ্নয়ে। ওঁ যে তে শতমিত্যাদি ইদং বরুণায় বিষ্ণবে বিশ্বেভ্যো
দেবেভ্যো মরুদ্ভ্যঃ স্বর্কেভ্যঃ। ওঁ উদুত্তমমিত্যাদি। ইদং বরুণায় ততঃ প্রজাপত্য হোমঃ।
ততঃ স্বিষ্টিকৃদ্ধোমঃ। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। ততঃ সংস্রবং প্রাশ্য আচম্য
ব্রহ্মণে দক্ষিণাং দদ্যাৎ। পৃথিবি ত্বং শীতলা ভব। ইত্যনেন ঐশান্যাং তুগ্ধাদিকং দত্ত্বা শ্রুবলগ্নভস্মনা ওঁ কশ্যপস্য

মাদায় সকুশান্ কেশান্ ছেদয়েৎ। ওঁ যেনাবপৎ সবিতা ক্ষুরেণ সোমস্য রাজ্ঞো বরুণস্য বিদ্বান্ তেন বপামি ব্রহ্মণো
বপতেদমস্যায়ুষং জরদষ্টির্যথাসৎ। ইতি মন্ত্রেণ সকুশাংস্তান্ কেশান্ ছিত্ত্বা কুমারস্যোত্তরে কেনাপি বিধৃতে পূর্ব্বস্থাপিত গোময়-
পিণ্ডে তূষ্ণীং নিঃক্ষিপেৎ। ততঃ সর্ব্বমেব কেশস্তেমনাদি গোময়পিণ্ডে ছিন্নকেশ প্রক্ষেপান্তমমন্ত্রকমপরং দক্ষিণপার্শ্বে বারদ্বয়ং
কর্ত্তব্যং। ততঃ শিরঃ পশ্চিমে পার্শ্বেঽপি দক্ষিণপার্শ্ববদেব তেনৈবানুষ্ঠানক্রমেণ সর্ব্বং বারত্রয়ং কর্ত্তব্যং। প্রথমং গুচ্ছচ্ছেদনমন্ত্রস্তু
ওঁ কশ্যপস্য ত্র্যায়ুষং। ওঁ যমদগ্নেস্ত্র্যায়ুষং ওঁ যদ্দেবানাং ত্র্যায়ুষং তত্তে ঽস্তু ত্র্যায়ুষং। সর্ব্ব এব পূর্ব্বানুষ্ঠানক্রমেণ সমন্ত্রকং
বারদ্বয়ং কর্ত্তব্যং। তথা শির উত্তরেঽপি দক্ষিণশিরঃ পার্শ্ববদেব তেনৈবানুষ্ঠানক্রমেণ বারত্রয়ং কর্ত্তব্যং। প্রথমচ্ছেদনমন্ত্রস্তু
ওঁ যেন ভূরিশ্চরা দিবং যে কে চ পশ্চাদধিমূর্য্যং। তেন তে বপামি ব্রহ্মণা জীবাতবে জীবনায় সুশ্লোক্যায় স্বস্তয়ে। ততো ১৫৬
লৌহক্ষুরং শিরসি দক্ষিণাবর্ত্তেন ভ্রাময়েৎ। সমন্ত্রমেকভাগঃ। অপরভাগদ্বয়মমন্ত্রকং বারত্রয়ং। কেশান্তে তু সংমুখে শিরসি ত-
থৈব ভ্রাময়েৎ। ওঁ ক্ষুরেণ মজ্জয়তা সুপেবসা বপ্তা বা বপতি কেশাংশ্ছিন্দি শিরো মাস্যায়ুঃ প্রমোষীঃ ইতি মন্ত্রেণ কে-
শান্তে তু শিরোমুখমাস্যায়ুঃ প্রমোষীরিতি বিশেষঃ। ততস্তেনৈব জলেন সর্ব্বং শিরস্তেময়িত্বা নাপিতায় ক্ষুরং দদাতি ওঁ অ-
ক্ষুণ্বং পরিবপং ইতি মন্ত্রেণ। ততঃ পঞ্চশিখত্বাদিরূপং যথা কুলাচার ক্ষৌরং কারয়িত্বা কেশাংস্তস্মিন্ গোময়পিণ্ডে প্রক্ষি-
পেৎ। মঙ্গলাচারপূর্ব্বকং গোষ্ঠে সরসি পুষ্করিণ্যাং বা নিঃক্ষিপেৎ। ততঃ কুমারং পুনঃ স্নাপিতং কৃতমঙ্গলাচারং তথৈবাগ্নেঃ
পশ্চিমে উপবেশ্য শান্তিং কৃত্বা কুমারমভিষিচ্যাশীর্ব্বাদং কৃত্বাচ্ছিদ্রাবধারণং কুর্য্যাৎ। কেশান্তে দ্বয়ং বিশেষঃ। আচার্য্যায়

গৌর্দ্দেয়া। সংবৎসরং যাবদবপনং ব্রহ্মচর্য্যঞ্চ অশক্তৌ দ্বাদশরাত্রং ত্রিরাত্রং বা॥ * ॥ ইতি চূড়াকরণপদ্ধতিঃ॥ * ॥
অথোপনয়নং। মনুঃ। গর্ভাষ্টমেঽষ্টমে বাব্দে ব্রাহ্মণস্যোপনয়নং। তথাচাহ পারস্করঃ। অষ্টবর্ষং ব্রাহ্মণমুপনয়েৎ। গর্ভা-
ষ্টমে বা একাদশবর্ষং রাজন্যং দ্বাদশবর্ষং বৈশ্যং যথাকুলং বা সর্ব্বেষামিতি। তত্র গর্ভাষ্টমাষ্টমযোস্তুল্যন্যায়ত্বাদ্বিকল্প এব
ন চাপকল্পঃ। যথা মঙ্গলবচনাৎ। তত্রাপি নবমাদিষু ক্রিয়মাণে যস্মিন্ কুলে মঙ্গলং কল্যাণং দৃষ্টং তত্র কুলাচার এব
কর্ত্তব্যঃ। তত্র প্রথমং নিবন্ধোক্তকালে শুভদিবসে নির্ব্বর্ত্তিতনিত্যকৃত্যঃ পিতা বিবাহপদ্ধত্যুক্তক্রমেণ গৌর্য্যাদিমাতৃকাপূজাং বৃদ্ধি-
শ্রাদ্ধঞ্চ কৃত্বা শুভে লগ্নে প্রাঙ্গণে ছায়ামণ্ডপে আচম্য প্রাঙ্মুখ উপবিশ্যাগ্নিস্থাপনং কুর্য্যাৎ। তত্র হস্তপ্রমাণং স্থণ্ডিলং ত্রিঃ
সংমৃজ্য গোময়েন ত্রিরুপলিপ্য কুশেন তূষ্ণীং পূর্ব্বাগ্ররেখাত্রয়ং কৃত্বা তত্রোৎকীর্ণমৃত্তিকাং ত্রিরুদ্ধৃত্য জলেন ত্রিরভ্যুক্ষ্যাত্মদ-
ক্ষিণে হবিমানীয় জ্বলৎকুশেন ক্রব্যাদাংশং ত্যক্ত্বা তূষ্ণীং স্থণ্ডিলে বহ্নিমারোপ্য ব্রাহ্মণত্রয়ভোজনমুৎসৃজেৎ। ততো ব্রাহ্মণেন
সহ কুমারং ভোজয়িত্বা ক্ষৌরং স্নানঞ্চ কারয়িত্বা স্রগ্দামভিরলঙ্কৃত অন্যে তচ্ছিষ্যাঃ স্থাপিতাগ্নেঃ পশ্চিমে গুরু-
সমীপমানয়ন্তি। ততো গুরুরগ্নেঃ পশ্চাদুপস্থাপ্য মাণবকমাহ। ওঁ ব্রহ্মচর্য্যমাগামীতি ব্রূহি। ততো মাণবকঃ। ওঁ ব্রহ্মচর্য্য-
মাগামীতি ব্রূয়াৎ। পুনরাচার্য্যঃ ওঁ ব্রহ্মচর্য্যমাসানীতি ব্রূহি। ততো মাণবকঃ ওঁ ব্রহ্মচর্য্যমাসানীতি ব্রূয়াৎ। ততো গুরুঃ
ক্ষৌমাদ্যন্যতমং শুক্লং বাসঃ কুমারং পরিধাপয়তি। ওঁ যেনেন্দ্রায় বৃহস্পতির্বাসঃ পর্য্যাদধাদমৃতং তেন ত্বা পরিদধাম্যায়ুষে
দীর্ঘায়ুষ্টায় বলায় বর্চ্চসে। ইতি মন্ত্রেণ ততো মৌঞ্জ্যাদ্যন্যতমাং মেখলাং ত্রিরাবৃত্তাং কুলাচারেণ প্রবরসংখ্যয়া ত্রিবেষ্টনগ্রন্থি-

যুক্তাং বধ্নাতি। ওঁ ইয়ং দুরুক্তাৎ পরিবাধমানা বর্ণং পবিত্রং পুনতী ন আগাৎ। প্রাণাপানাভ্যাং বলমাদধানা স্বসাদেবী শুভগা মেখলেয়ং। ইতি মন্ত্রেণ। তত একাং ত্রিদণ্ডিকাং প্রযচ্ছতি। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং বৃহস্পতির্যৎ সহজং পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ। ওঁ যো মে দণ্ডঃ পরাপতদ্বৈহায় সো হধিভূম্যং তমহং পুনরাদদৎ আয়ুষে ব্রহ্মণে ব্রহ্মবর্চ্চসায়। অথ কুমারং তস্যৈবাঞ্জলিং গুরুর্জলাঞ্জলিনা পূরয়তি। ওঁ আপো হিষ্ঠেতি ওঁ যো বঃ শিবতম ইতি ওঁ তস্মা অরঙ্গ মাম ইতি মন্ত্রেণ। অথ কুমারং জলাঞ্জলিং দাপয়িত্বা সূর্য্যমুদীক্ষয়তি। ওঁ তচ্চক্ষুর্দ্দেবহিতং ইতি মন্ত্রেণ। ততো মাণবকস্য দক্ষিণস্কন্ধাসক্তহস্তেন হৃদয়ং স্পৃষ্ট্বা জপতি। ওঁ মম ব্রতে তে হৃদয়ং দদামি মম চিত্তমনু চিত্তন্তে হস্তু মম বাচমেকমনা জুষস্ব বৃহস্পতিস্ত্বা নিযুনক্তু মহ্যং ইত্যনেন মন্ত্রেণ। অথ মাণবকং দক্ষিণহস্তেন গৃহীত্বা গুরুঃ পৃচ্ছতি। ওঁ কো নামাসি ততো মাণবক আহ। শ্রী অমুক দেবশর্ম্মাহং ভোঃ। ততো গুরুর্ম্মাণবকমাহ। ওঁ কস্য ব্রহ্মচর্য্যাসি। তত্র ওঁ ভবতঃ ইতি মাণবকেনোক্তে গুরুঃ পঠতি। ওঁ ইন্দ্রস্য ব্রহ্মচর্য্যস্যাগ্নিরাচার্য্যস্তবাহমাচার্য্যস্তবাসৌ। অত্রাসাবিতি স্থানে শ্রীঅমুক দেবশর্ম্মন্নিতি। অথ মাণবকং ভূতেভ্যো দদাতি গুরুঃ ওঁ প্রজাপতয়ে ত্বা পরিদদামি দেবায় ত্বা সবিত্রে পরিদদামি। অদ্ভ্যস্ত্বৌষধিভ্যঃ পরিদদামি। দ্যাবা পৃথিবী ত্বা পরিদদামি। বিশ্বেভ্যস্ত্বা দেবেভ্যঃ পরিদদামি। সর্ব্বেভ্যস্ত্বা ভূতেভ্যঃ পরিদদাম্যরিষ্ট্যৈ ইতি মন্ত্রেণ। ততো মাণবকো হগ্নিপ্রদক্ষিণীকৃত্য গুরোরুত্তর উপবিশতি। ততো গুরুর্যথাশক্তি ব্রহ্মাণং বরয়েৎ। ততো হগ্নের্দক্ষিণে প্রাগগ্রকুশসমেতং ব্রহ্মাসনমাস্তীর্য্য তত্র ব্রহ্মন্নিহোপবিশ্যতামিতি ব্রহ্মাণমুপবেশ্য অগ্নেরুত্তরে

প্রণীতা প্রণয়নং কৃত্বা সকৃদচ্ছিন্নকুশেন ঈশানকোণাদারভ্য দক্ষিণাবর্ত্তেনাগ্নিং পরিস্তীর্য্য অগ্নেরুত্তরে প্রয়োজন দ্রব্যং দক্ষিণাদিতো যথাক্রমমাসাদয়েৎ। তদ্যথা। পবিত্রচ্ছেদনানি ত্রীণি পবিত্রে প্রোক্ষণীপাত্রং আজ্যস্থালী চরুস্থালী সম্মার্জ্জনকুশাঃ ষট্ উপযমনকুশাঃ ত্রয়োদশ সমিধঃ তিস্রঃ স্রুবং আজ্যং ব্রহ্মদক্ষিণা অপরং সমিত্রয়ঞ্চ। ততঃ পূর্ব্বাসাদিতপবিত্রং পবিত্রচ্ছেদনকুশেন ছিত্বা প্রোক্ষণীপাত্রে দত্ত্বা তত্র প্রণীতাজলং নিধায় বামহস্ততলে প্রোক্ষণীপাত্রং বিন্যস্য দক্ষিণহস্তেন প্রোক্ষণীপাত্রস্থ জলং গৃহীত্বা কতিপয় প্রোক্ষণীজলেন প্রোক্ষণীজলং অন্যানি চ পত্রাণি সংপ্রোক্ষ্য প্রণীতাদক্ষিণে হসকরে প্রোক্ষণীপাত্রং স্থাপয়েৎ। ততআজ্যস্থালীমাত্মসম্মুখমানীয় পূর্ব্বাসাদিতমাজ্যং তস্যাং নিরূপ্য অগ্নাবধিশ্রিত্য পর্য্যগ্নিকরণায় জ্বলদগ্নিং গৃহীত্বা আজ্যস্থালীং ত্রিঃ পরিবেষ্ট্য তমগ্নিং তত্রৈবাগ্নৌ ক্ষিপেৎ। ততঃ পূর্ব্বাসাদিতস্রুবং প্রতপ্য সম্মার্জ্জন কুশেন মূলাদগ্রং পুনরগ্রান্মূলং যাবৎ সম্মৃজ্য পুনঃ প্রতপ্য প্রোক্ষণ্যুত্তরে স্থাপয়েৎ। ততঃ আজ্যস্থালীমাত্মসম্মুখে অবতার্য্য প্রোক্ষণীপাত্রস্থ পবিত্রং গৃহীত্বা আজ্যস্য কিঞ্চিদুত্তোলনরূপমুৎপবনং কৃত্বা আজ্যমবেক্ষেৎ। প্রোক্ষণীজলঞ্চ উপযমনকুশান্ বামহস্তেন গৃহীত্বা পূর্ব্বাসাদিতি সমিত্রয়মুত্তিষ্ঠন্নগ্নৌ প্রক্ষিপ্য উপবিশ্য প্রোক্ষণীপাত্রস্থং পবিত্রং জলং গৃহীত্বা তজ্জলেনেশানাদিতো দক্ষিণাবর্ত্তেনাগ্নিং পর্য্যুক্ষেৎ। ততঃ পবিত্রং প্রণীতায়াং নিধায় প্রোক্ষণীপাত্রং সংস্রবার্থমগ্নেরুত্তরে স্থাপয়েৎ। ততো যজমানো হস্বারম্ভপূর্ব্বকং স্রুবং গৃহীত্বা আজ্যেনাঘারাবাজ্যভাগৌ জুহুয়াৎ। তত্রাঘারৌ। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ ইন্দ্রায় স্বাহা ইদমিন্দ্রায়। ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ওঁ সোমায় স্বাহা। ইদং সোমায়। হুত্বা হুত্বা স্রুবসংলগ্নং হবিঃশেষং প্রাশনার্থং প্রোক্ষণীপাত্রে স্থাপ- ১৫৭

য়েৎ। ততো হস্বারম্ভত্যাগঃ। সমুদ্ভবনামানমগ্নিং কৃত্বা পূজয়েৎ। ততো মহাব্যাহৃতি হোমঃ। ওঁ ভূঃ স্বাহা। ইদং ভূঃ। ওঁ ভুবঃ স্বাহা। ইদং ভুবঃ। ওঁ স্বঃ স্বাহা। ইদং সূর্য্যায়। ততো বিধুনামানমগ্নিং সংস্থাপ্য সঙ্কল্পং কৃত্বা ওঁ ত্বন্নো হগ্নে ইত্যাদিনা প্রায়শ্চিত্তহোমং কুর্য্যাৎ। ততঃ প্রজাপত্য হোমঃ। ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে। ততঃ স্বিষ্টিকৃদ্ধোমঃ। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। ততঃ সংশ্রবং প্রাশ্যাচম্য ব্রহ্মণে দক্ষিণাং দদ্যাৎ। ততো গুরুর্ম্মাণবকং সংশাস্তি। ওঁ ব্রহ্মচার্য্যসি। ওঁ ব্রহ্মচার্য্যস্মীতি মাণবকঃ। পুনর্গুরুঃ ওঁ আপোশানং কর্ম্ম কুরু। ওঁ আপোশানি ইতি মাণবকঃ। পুনর্গুরুঃ ওঁ কর্ম্ম কুরু। করবাণি ইতি মাণবকঃ। পুনর্গুরুঃ ওঁ মা দিবা স্বাপ্সীঃ। ওঁ ন স্বপানি ইতি মাণবকঃ। পুনর্গুরুঃ ওঁ বাচ্যং যচ্ছ। ওঁ যচ্ছামি ইতি মাণবকঃ। পুনর্গুরুঃ ওঁ সমিধমাধেহি। ওঁ আদধামি ইতি মাণবকঃ। ততো হগ্নেরুত্তরে প্রাঙ্মুখ উপবিষ্টঃ প্রত্যঙ্মুখায় শিষ্যায় দক্ষিণহস্তেন গুরোর্দক্ষিণপাদং বামহস্তেন বামপাদং গৃহীত্বা উপসন্নায় গুরুমুখং সমীক্ষ্যমাণায় গাশত্রীং দদাতি গুরুঃ। প্রথমবারং পাদাবচ্ছেদেন পাঠয়েৎ। প্রথমপাদং যথা ওঁ তৎ সবিতুর্ব্বরেণ্যং ভর্গো-দেবস্য ধীমহি। ইত্যর্দ্ধাবচ্ছেদং। তৃতীয়বারং প্রণবেন সহৈব সর্ব্বাংশব্যাহৃতিকাং গায়ত্রীং পাঠয়েৎ। যথা। ওঁ ভূর্ভুবঃ স্বঃ তৎ সবিতুর্ব্বরেণ্যং ভর্গো দেবস্য ধীমহি ধিয়ো যো নঃ প্রচোদয়াৎ ওম্। অনেন ক্রমেণ গায়ত্রীং মাণবকায় দদ্যাৎ। ততো মাণবকঃ। সমিধাদানং কুর্য্যাৎ। ততঃ প্রথমং। দক্ষিণহস্তেনাগ্নিং পরিসমূহতি। ওঁ অগ্নে সুশ্রবঃ সুশ্রবসং মা কুরুঃ। যথা তমগ্নে সুশ্রবঃ সুশ্রবাঙঁসি। এবমগ্নে সুশ্রবসো শ্রবসং মা কুরু। যথা ত্বমগ্নে দেবানাং যজ্ঞস্য নিধিপোঽসি এবমহং মনুষ্যাণাং

দেবস্য নিধিপো ভূয়াসং। ইত্যনেন মন্ত্রেণ। ততো জলেন ঈশানাদিতো দক্ষিণাবর্ত্তেনাগ্নিং পর্য্যুক্ষেৎ। উত্থায় একাং সমি-
ধমাদধাতি ওঁ অগ্নে সমিধমাহার্ষং বৃহতে জাতবেদসে যথা ত্বমগ্নে সমিধা সমিধ্যসি। এবমহমায়ুষা মেধয়া বর্চ্চসে সমিন্ধে
জীবপুত্রো মমাচার্য্যো মেধা ব্যহমসাম্যনিরাকরিষ্ণুঃ। আয়ুষ্মান্ যশস্বী ব্রহ্মবর্চ্চসান্নাদো ভূয়াসং অগ্নয়ে স্বাহা। ইদমগ্নে ইত্য-
নেন মন্ত্রেণ। এবং পরিসমূহমাদিক্রমেণ অপরসমিদ্বয়ং হুত্বা তত্রৈবাগ্নৌ হস্তৌ প্রতপ্য তাভ্যাং স্বং মুখং মার্জ্জয়তি। ওঁ তনূপা অগ্নে
হসি তন্বং মে পাহ্যায়ুর্দ্দা অগ্নে হস্যায়ুর্ম্মে ধেহি বর্চ্চোদা অগ্নে হসি বর্চ্চো মে ধেহি। অগ্নে যন্মে ত্বা ঊনং তন্ম আপৃণ। ওঁ মেধাং মে
দেবঃ সবিতা আদধাতু মেধাং মে দেবী সরস্বতী আদধাতু মেধামশ্বিনৌ দেবা বাধত্তাং পুষ্করস্রজৌ। ইত্যাভ্যাং মন্ত্রভ্যাং তথৈব প্রাণী-
প্রতপ্য সর্ব্বাণ্যঙ্গানি মার্জ্জয়েৎ। ওঁ অঙ্গানি চ মে আপ্যায়ন্তাং তথা মুখং ওঁ বাক্ চ আপ্যায়তাং নাসিকে একৈকশঃ ওঁ নাসিকা চ 
আপ্যায়তাং ওঁ প্রাণাশ্চ আপ্যায়ন্তাং। তথা একৈকশশ্চক্ষুষী চক্ষুশ্চ ম আপ্যায়তাং। তথা একৈকশঃ কর্নৌ ওঁ শ্রোত্রঞ্চ আপ্যা-
য়তাং। তথা সর্ব্বাঙ্গং ওঁ যশোবলঞ্চ আপ্যায়তাং। তথা ললাটাদিষু ভস্মনা অনামিকয়া তিলকং দদ্যাৎ। তত্র ললাটে ওঁ কশ্যপস্য
ত্র্যায়ুষং তথা গ্রীবায়াং যমদগ্নেস্ত্র্যায়ুষং দক্ষিণাংশে ওঁ যদ্দেবানাং ত্র্যায়ুষং। হৃদি তন্মে হস্তু ত্র্যায়ুষং। অথ ভিক্ষাচরণং তত্র প্রথমং
মাতরং ভগিনীং মাতৃস্বসারং যাচেত। ওঁ ভবতি ভিক্ষাং দেহি। পুরুষন্তু যাচ্যমানং ওঁ ভবন্ ভিক্ষাং দেহি ইতি যাচেত। ততো গুরবে
ভিক্ষাং নিবেদয়েৎ। ততো গুরুঃ শান্ত্যুদকং কৃত্বা শিষ্যমভিষিচ্যাশীর্ব্বাদমচ্ছিদ্রাবধারণঞ্চ কুর্য্যাৎ। ততো ব্রহ্মচারী মৌনী মৌনাশক্তো

নিয়তবাক্ দিনশেষং নীত্বা সন্ধ্যামুপাস্য পূর্ব্ববৎ সমিদাধানং কৃত্বা অক্ষারলবণং ভুঞ্জীত। ততো যাবদ্ব্রহ্মচর্য্যং প্রাতরেব সমিদাধানং। তথা ভিক্ষাচরণং গুরুশুশ্রূষাদিকঞ্চ কুর্য্যাৎ॥ * ॥ ইত্যুপনয়নং॥ * ॥ * ॥ * ॥

অথ বেদারম্ভঃ। তত্র শুভ দিবসে ব্রহ্মচারী নিত্যকৃত্যং সমাপ্য বিবাহপদ্ধত্যুক্তক্রমেণ গৌর্য্যাদিমাতৃকাপূজাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা গুরু-সমীপং যায়াৎ। গুরুরপি প্রাঙ্গণে ছায়ামণ্ডপে ব্রহ্মচারিণং আত্মন উত্তরে উপবেশ্যাগ্নিস্থাপনং কৃত্বা আঘারাবাজ্যভাগৌ হুত্বা সমুদ্ভব-নামানমগ্নিং কৃত্বা বেদাহুতি হোমং কুর্য্যাৎ। ও অগ্নে ত্বং সমুদ্ভব নামাসীতি নামকৃত্বা ধ্যাত্বাভ্যর্চ্চ্য জুহুয়াৎ। ওঁ পৃথিব্যৈ স্বাহা ইদং পৃথিব্যৈ ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ইতি ঋগ্বেদে। ওঁ অন্তরীক্ষায় স্বাহা ইদমন্তরীক্ষায়। ওঁ বায়বে স্বাহা ইদং বায়বে। ইতি যজুর্ব্বেদে। ওঁ দিবে স্বাহা ইদং দিবে। সূর্য্যায় স্বাহা ইদং সূর্য্যায়। ইতি সামবেদে। ওঁ দিগ্ভ্যঃ স্বাহা ইদং দিগ্ভ্যঃ। ওঁ চন্দ্র-মসে স্বাহা ইদং চন্দ্রমসে। ইত্যথর্ব্ববেদে। অথ সর্ব্ববেদ সাধারণাহুতয়ঃ। ওঁ ব্রহ্মণে স্বাহা ইদং ব্রহ্মণে। ওঁ ছন্দোভ্যঃ স্বাহা ইদং ছন্দোভ্যঃ। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ দেবেভ্যঃ স্বাহা ইদং দেবেভ্যঃ। ওঁ ঋষিভ্যঃ স্বাহা ইদং ঋষিভ্যঃ। ওঁ শ্রদ্ধায়ৈ স্বাহা ইদং শ্রদ্ধায়ৈ। ওঁ মেধায়ৈ স্বাহা ইদং মেধায়ৈ। ওঁ সদসম্পতয়ে স্বাহা ইদং সদসম্পতয়ে। ওঁ অনুমতয়ে স্বাহা ইদং অনুমতয়ে। ততো হন্নারম্ভঃ। মহাব্যাহৃতি হোমং কুর্য্যাৎ। ওঁ ভূঃ স্বাহা ইদং ভূঃ। ওঁ ভুবঃ স্বাহা ইদং ভুবঃ। ওঁ স্বঃ স্বাহা ইদং সূর্য্যায়। ততঃ প্রায়শ্চিত্তহোমঃ। ততঃ প্রাজাপত্যহোমঃ। ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে। ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা ইদমগ্নয়ে স্বিষ্টিকৃতে। ততঃ সংস্রবং প্রাশ্যাচম্য ব্রহ্মণে।

দক্ষিণাং দদ্যাৎ। ততো গুরুরগ্রে প্রাঙ্মুখ উপবিষ্টঃ শিষ্যমুখসমীক্ষ্যমাণো মাণবকায় প্রত্যঙ্মুখায় উপবিষ্টায় দক্ষিণ হস্তেন গুরোর্দ্দক্ষিণপাদং বামহস্তেন বামপাদং গৃহীত্বা উপসন্নায় গুরুমুখসমীক্ষ্যমাণায় ওঁকার ব্যাহৃতিপূর্ব্বকান্ পঠিতব্যানেব বেদানধ্যাপয়েৎ। প্রথমবারং পাদাবচ্ছেদেন দ্বিতীয়বারমর্দ্ধাবচ্ছেদেন তৃতীয়বারং সহৈব সর্ব্বাং ঋচং পঠন্ মাণবকং পাঠয়েৎ। যজুর্ব্বেদঋগ্বেদ সামবেদাথর্ব্ববেদাদি মন্ত্রান্ পাঠয়েৎ। তদ্যথা। ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজং। হোতারং রত্নধাতমং ॥ ১ ॥ ওঁ ইষেত্বোর্জ্জে ত্বা বায়বস্থঃ দেবো বঃ সবিতা প্রাপয়তু শ্রেষ্ঠতমায় কর্ম্মণে ॥ ২ ॥ ওঁ অগ্ন আয়াহি বীতয়ে গৃণানো হব্যদাতয়ে নিহোতা সৎসি বর্হিষি ॥ ৩ ॥ শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে সংযোরভিস্রবন্তু নঃ ॥ ততঃ শান্তিং কৃত্বাশীর্ব্বাদং কৃত্বাচ্ছিদ্রাবধারণং কুর্য্যাৎ। ইতি বেদারম্ভ পদ্ধতিঃ ॥ * ॥ * ॥ * ॥ 

অথ সমাবর্ত্তনং। তত্র প্রথমং নিবন্ধোক্তকালে শুভ দিবসে ব্রহ্মচারী গুরোঃ পারিতোষিকং দত্ত্বা গুরুং প্রার্থয়েৎ। গুরো স্নাস্যামীতি। স্নাহীতি গুরুণোক্তে বিবাহপদ্ধতিক্রমেণ গৌর্য্যাদিমাতৃকা পূজাং বৃদ্ধিশ্রাদ্ধঞ্চ কৃত্বা গুরুসমীপং যায়াৎ। গুরুরপি ছায়ামণ্ডপে ব্রহ্মচারিণং আত্মন উত্তরত উপবেশ্য তেজো নামানমগ্নিং পূর্ব্ববৎ সংস্থাপ্য হোমং কুর্য্যাৎ। দ্রব্যাসাদনেত্বয়ং বিশেষঃ। প্রাগগ্রকুশোপরি পশ্চিমাদিক্রমেণ শুচি জলপূর্ণাচ্যুত পল্লবাস্যাঃ সকুশা অষ্টৌ কলসাঃ। ঔড়ুম্বর দ্বাদশাঙ্গুল দন্তকাষ্ঠং পিষ্ট তিলপিণ্ডং অনুলেপনার্থং সুগন্ধি দ্রব্যং পরিধানোত্তরীয়ার্থং নূতন বস্ত্রযুগ্মং উষ্ণীশার্থং নূতন-বস্ত্রং যজ্ঞোপবীতং পরিধেয়ং পুষ্পং সৌবর্ণকুণ্ডলদ্বয়ং অঞ্জনং দর্পণং ছত্রং পাদুকাযুগলং বৈণবদণ্ডং। ইত্যাদ্যুপস্থানং কৃত্বা পূর্ব্ববৎ ব্রহ্মণোহম্বারম্ভ পূর্ব্বকং স্রুবেণাঘারাবাজ্য